पूंगतिमयूखः

४७१५

स्टीन कैटेलाग
पुस्तके अलावा

१



ॐश्रीगणेशायनमः श्रीगुरुभ्योनमः योलीलयासंतनुतेचविश्वंतत्पालयत्यात्मनिविश्वरूपे तपंनयत्याशुच
पूर्णरूपःशिवंतनोत्वाशुरविर्ममासौ १ महोमहान्तंसमाराध्यसमाकर्ण्यगुरोर्गिरः समुच्यतेनीलकंठोवक्तुं
शांतिकपौष्टिकं २ प्रतारकैराद्यतनमत्रकिंचिन्मयान्तनिर्मूलनयातदुक्तिजं हृतोक्तितातोनहितेनकाचित्तव
पुष्पहीनापचितिर्नहीयते अस्पष्टपापविशेषनिदानकैहिकमात्रानिष्टनिवर्तकंपापाप्रयुक्तकवैधकर्मशांति
कं तपादिहरदानादावतिप्रसंगंवारयितुंनिदानकांतं आमुष्मिकानिष्ट निवर्तकेत्तंवारयितुंरैहिकेति प्राय
श्चित्तेवारयितुंमात्रपदं प्रायश्चित्तंत्वामुष्मिकानिष्टनिवर्तकमय अभिचारप्रत्यभिचारादौवारयितुंपापाप्रयोज
कमिति तयोःफलतोहिंसात्वेनतदनुष्ठानप्रपश्चितोक्तेपापप्रयोजकत्वात् अनिष्टनिवृत्तिकत्वंचशांतिक
स्यतन्निदानपापनाशरूपसामग्रीविघटकत्वेनपुष्टिफलकंवैधंकर्मपौष्टिकं तत्रपरिभाषामार्कंडेयपुराणे ॥
शिरःस्नानंचकुर्वीतदैवंपित्र्यमथापिवा प्राङ्मुखोदङ्मुखोवापिश्मश्रुकर्मचकारयेत् तत्रैव देवार्चनादिकर्मा
णितथागुर्वभिवादनं कुर्वीतसम्यगाचम्यप्रयत्नोपिसदाद्विजः बृहन्मनुः प्राणानायम्यकुर्वीतसर्वकर्माणिसंयतः
मार्कंडेयः संकल्पंविधिवत्कुर्यात्स्नानदानव्रतादिकं देवलः मासपक्षतिथीनांचनिमित्तानांचसर्वशः उल्लेख
नमकुर्वाणोनतस्यफलभाग्भवेदिति मासपक्षतिथयः प्रयोगाधिकरणभूताः सर्वेपियत्रअनेकदिनसाध्ये
कर्मणि आद्यदिनेसंकल्पकालीनतिथिमधिकरणत्वेनोल्लिख्यज्योतिष्टोमेनाहंयक्ष्य इत्यादिसंकल्पवाक्यंप्रयुंज्य
तेयाज्ञिकाः तत्रपदानामन्वयायोग्यतादानादर्तव्यं यदपिकेचित्तेनरूपेणप्रयोगगततयाविहितानामेवमा

त्यादीनामुल्लेखइति तदपि न मानाभावात् अविहितमासादिकआधानादौ मासपक्षतिथीनांज्योतिष्टोमए
कादशीव्रतादौ च मासपक्षयोरुल्लेखाभावप्रसंगाच्च अतोज्योतिष्टोमादावेकादश्यादिपूर्णिमांतानामुल्लेखः।
एवमन्यत्रापि इति दिक् अत्र च शूद्राणामप्यधिकारः श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इत्यादिवाक्येषु
श्रावणस्य हृत्पर्यंततया शाब्दप्राप्तत्वेन न तद्विधौ वाक्यवैयर्थ्यापत्तेरर्थजविवक्षया श्रवणविधिना तेषां पुराणश्रवण।
धिकारेण ज्ञानसद्भावात् वैदिकमंत्राभावे कथं तदंतकर्मस्वधिकार इति चेत् शृणु धर्मेप्सवस्तु धर्मज्ञाः सतां धर्ममनु
ष्ठिताः मंत्रवर्ज्यं न दुष्यंति प्रशंसां प्राप्नुवंति चेति मनुना मंत्रवर्जनात् मंत्रवर्जितेषूपवासादिष्वधिकारार्थमिदं न तु
समंत्रकेषु मंत्रपर्युदासार्थमिति तन्न अमंत्रकोपवासादिषु श्रवणविधिनैवाधिकारसिद्धावेतद्वाक्यानर्थक्यापत्तेः।
अत एव मोक्षधर्मेष्वपि मंत्रवर्ज्यं न दुष्यंति कुर्वाणाः पौष्टिकीं क्रियामिति अत्रैतद्वाक्यस्य पौराणत्वेन तत्सामान्योप।
स्थित पौराणक्रियोद्देशेन मंत्रवर्जनविधौ पौष्टिकीमित्युद्देश्यविशेषणत्वेनाविवक्षितं एवं च मनुवाक्यस्यैतस्य चैकैव
वश्रुतिर्मूलत्वेन कल्प्यते गृह्यपरिशिष्टे आदौ विनायकः पूज्यः अंते तु कुलदेवता शौनकः पुण्याहवाचनविधिं व
क्ष्यामो यथाविधि प्रयोक्तुः कर्मणामादावंते चोदयसिद्धये कर्मप्रदीपे कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः
पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः १ प्रतिमासु च शुद्धासु लिखित्वा वा पटादिषु अपि वाक्षतपुंजेषु नैवेद्यैश्च
पृथग्विधैः २ कुड्यलग्नां वसोर्धारां सप्तवारं घृतेन तु कारयेत् पंचधारां वा नातिनीचां न चोच्छ्रिताः ३ आयुष्याणि
च शांत्यर्थं जप्त्वा तत्र समाहितः षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमे ४ दिति षड्भ्य इति छंदोगकात्यायनपरं अन्ये

शां·म·
२

षांतुनवदैवतंअन्वष्टकासुवृद्धौचगयायांचक्षयेहनि: अत्रमातु: पृथक् श्राद्धमन्यत्रपतिनासहेतिवचनात् स
र्वत्राचार्येयजमानसमशाखीयएव अन्यथाचार्यस्ययजमानशाखाध्ययनाभावेतच्छाखीयपदार्थानांनिर्वाहएवन
स्यात् स्वशाखानुष्ठानेतुवैगुण्यं तथाचपराशर: य:स्वशाखांपरित्यज्यपरशाखांसमाश्रयेत् अप्रमाणमृषिंकृत्वा
सोंधेतमसिमज्जतीति ऋत्विजस्तुभिन्नशाखीया: अपिसर्वथाचार्यब्रह्मर्त्विजोमधुपर्केणपूज्या: ऋत्विजोवृत्वामधु
पर्कमाहरेदित्याश्वलायनोक्ते: संपूज्यमधुपर्केणऋत्विज: कर्मकारयेत् इतिविश्वामित्रोक्तेश्च यऋत्विग्यच्छाखीयंक
र्मकरोतितच्छाखोक्तप्रकारेणकाण्डानुसमयेनमधुपर्कंकुर्वंतियायज्ञिका: केचित् परेयजमानशाखोक्तेनय
जमानेनस्वशाखाया: पदार्था: अनेकेषुऋत्विक्षुपदार्थानुसमयेनानुष्ठेयाइतितद्युक्तं तत्तच्छाखाध्ययनजन्यज्ञान
सांगत्वादेकप्रयोगविधिपरिग्रहाच्च ऋत्विग्भ्योदेयंउक्तंलिंगपुराणे वस्त्रयुग्मंतथापूरंकेयूरंकर्णभूषणं अंगुली
भूषणंचैवमणिबंधस्यभूषणं १ कंठाभरणमुक्तानिप्रारंभेधर्मकर्मण: पुरोहितायदत्वाथऋत्विग्भ्यश्चापिदापये
दिति आप:पूर्णंतेस्मिन्निमम्पूरंजलपात्रं मत्स्यपुराणे यजमान:सपत्नीक: पुत्रपौत्रसमन्वित: पश्चिमद्वारमा
श्रित्यप्रविशेद्यागमंडपं संग्रहेममंत्रेणस्वसिद्धार्थान् किरेद्वातामममंत्रत: प्रतिष्ठासारेसर्वत: पंचगव्येनप्रोक्षये
द्यागमंडपं आपोहिष्ठात्र्येचेनैवतत:स्वस्त्ययनंजपेत् तत्राहेमाद्रौवास्तुपूजाप्युक्ता समंडपंप्रविश्याथतोरणादि
प्रपूज्यच वास्तुज्ञानंतत:कुर्यात्प्रासादेमंडयेथवा वास्तुमंडलंचनैऋत्यां नैऋत्यांदिशिवा स्त्रीशांब्रस्नाश्चाद्यासमर्च
येदिति शारदोक्ते: वास्तुहोमस्तुभिन्नस्थंडिलेकार्य: मुख्यायतनेवा तत्राप्यादौपृथक् प्रयोगतयाप्रधानसंम २

तेनत्रतयावा शारदातिलकेतुहोमएवनोक्तः सर्वंचशांतिकपौष्टिकमहादानादिलौकिकाग्नौकार्यंश्रौतस्मार्ता
ग्निप्राप्तौमानाभावात् यत्तुमनुः वैवाहिकेग्नौकुर्वीतगार्ह्यंकर्मयथाविधि पंचयज्ञविधानंचपंक्तींचान्वाहिकींगृ
हीति तत्सर्वंगृह्योक्तपरं वैवाहिकइतिचदारदायाद्यकालीनयोरप्युपलक्षणं तत्सजातीयसंस्कारसैवसाधनता
वच्छेदकत्वात् यदपियाज्ञवल्क्यः स्मार्तंकर्मविवाहाग्नौकुर्वीतप्रत्यहंगृही दायकालाहृतेवापिश्रौतंवैताग्निका
ग्निष्विति तत्रापिसामान्यंस्मार्तपरंग्राह्यः उपसंह्रियते एतेनाहवनीयादयोरनिरस्तायदाहवनीयेजुहोतीत्यादौअ
अश्वप्रतिग्रहेष्टोग्नेर्दिकत्वसाम्येनवैदिकाश्वदानप्रतिग्रहोपस्थितिवद्वैदिकहोमोपस्थितेश्च यच्चाप्यत्रगार्ह्यस्मा
र्तएवश्रौतंवैतानिकएवेतिनियमेनस्वरसतःक्वापिकर्मणिश्रौतस्मार्ताग्न्योः प्राप्तिःसंभाव्यतेतथापिनसाहवनीया
वसथ्यत्वादिरूपेण किंतुलौकिकसाधारणज्वलनत्वेनैवअवैधाहुतिप्रक्षेपेआहवनीयत्वादिविचारानापत्तेश्च
अतएवसर्वाधानिनऔपासनाभावात् वैतानिकाश्रौतेष्वनेनग्राह्यैलौकिकएवकार्यं अमुमेवसर्वमर्थंस्मृत्य
र्थसारकृदपिसंजग्राह यस्त्वौपासनंकुर्यात्सर्वाधानीतुलौकिके स्मार्तंचलौकिकेकुर्याच्छ्रौतंवैतानिकाग्नि
ष्विति यत्तुनारायणवृत्तौ सर्वाधानीनासीमंतोन्नयनादिगार्ह्यकर्मार्थंस्मार्ताग्निरुत्पादनीयइति तत्रमूलंबौ।
धायनसूत्रं यदपिविज्ञानेश्वरोयह्यत्रौपासनइत्यूचे तत्रापिमूलमन्वेष्यंकातीयपरंवा तत्सूत्रेतथाम्नायात्
अतएवसविनायकशांतौलौकिकाग्निमेवोचत् अतःस्मृत्युक्तंलौकिकएवेति कृत्यरत्नाकरे शुभपात्रंतुकांस्य
स्यात्तेनाग्निंप्रणयेद्बुधः तस्याभावेशरावेणनवेनाभिमुखंचतं गोभिलीयेआहूयचैवहोतव्योपियत्रविहितोना।

लः तथालक्षहोमेचवह्निःस्यात्कोटिहोमेहुताशनः पूर्णाहुत्यांमृडोनामशांतिकेवरदःसदा अन्येषुसंस्कारादि
कर्मसुत्वग्नेर्नामविशेषाः प्रयोगरत्ने होमेविशेषोगोभिलीये नमुक्तकेशोजुहुयान्नानुपात्तिन जानुकः उत्तानेने
वहस्तेन अंगुष्ठाग्रेणपीडितं संहृतांगुलिपाणिस्तुवाग्यतोजुहुयाद्धविरिति वहुकर्तृकेहोमेप्रत्याहुतित्यागो
न्तेः होमारंभएवदेताश्चतुर्थ्यंतेनेदित्यसर्वाणिद्रव्याणित्यजेदितिहोमाग्न्यादयः इतिपरिभाषा अथविनायक
स्नपनं याज्ञवल्क्यः विनायकःकर्मविघ्नसिध्यर्थंविनियोजितः गणानामाधिपत्येचरुद्रेणब्रह्मणातथा १ तेनो
पसृष्टोयस्तस्यलक्षणानिनिबोधत स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति २ काषायवाससश्चैवक्रव्यादांश्चाधिरो
हति अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठति ३ व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः उपसृष्टउपद्रुतः स्वप्नेस्रोत
सापहियते ४ तत्रमृज्जातिवानत्ववगाहमात्रंविवक्षितं नतुशुभसूचकत्वात् अंत्यजैश्चांडालैः प्रत्यक्षलक्षणा
न्याह विमनाविफलारंभः संसीदत्यनिमित्ततः तेनोपसृष्टोलभतेनराज्यंराज्यनंदनः ६ कुमारीनेवभर्तारमप्र
पत्यंगर्भमंगना आचार्यत्वंश्रोत्रियस्त्वनशिष्योध्ययनंतथा ७ वणिक्लाभंनचाप्नोतिकृषिंचापिकृषीवलः संसीद
निकारणंविनादीनमनस्कोभवति एतदुपलक्षणं यस्यादृष्टं तचेष्टंसामग्रीसत्वेतन्नप्राप्नोतितदुपद्रुतोबोध्यः
सतदुपद्रवपरिहारार्थंकर्माह स्नपनंतस्यकर्तव्यंपुण्येह्निविधिपूर्वकं अत्रपुण्येन्हीत्यविशेषेपिविशेषोपरार्के भ
विष्ये शुक्लपक्षेचतुर्थ्यांचवारेणधिषणस्यच तिष्येचवीरनक्षत्रेतस्यैवपुरतोन्यपति अत्रादौदेवतांपूजोक्तातत्रै
वव्योमकेशांतसंपूज्यपार्वतीभीमजांतथा कुसुमसस्पितरंकेनमर्कमारंस्तितनथा १ धिषणंक्रोदपुत्रंचकोणंतत्

च्चारत विधुंतुदं वाहुलेयं नंदकस्य च धारिणमिति २ व्योमकेशः भीमजो गणेशः आरो भौमः सितः शुक्रः धि
षणो गुरुः क्लेदपुत्रः बुधः कोणः शनैश्चरः लक्ष्मीतद्धांधवश्चंद्रः वाहुलेयः स्कंदः नंदकधारी कृष्णः गौरसर्षपक
ल्केनसाज्येनोत्सादितस्य च सर्वौषधैः सर्वगंधैर्विलिप्तशिरसस्तथा १ भद्रासनोपविष्टस्य स्वस्तिवाच्या द्विजाः शुभाः
गौरसर्षपपिष्टेन गोघृतयुक्तेनोत्सादितस्योद्वर्तितस्य सर्वौषधानि च्छंदोगपरिशिष्टे कुष्ठं मांसी हरिद्रे द्वे मुराशैले
यचंदनं वचा कर्पूरमुस्ता च सर्वौषध्यः प्रकीर्त्तिताः इति सर्वगंधैश्चंदनकुंकुमागरुकस्तूरिकाजातिफलादिभिः
वेष्टांसितवस्त्रयुक्तादिवश्रीपर्णीभद्रासनं वस्तिवाच्याः स्वस्तिवाचनीयाः ब्राह्मणद्वारा स्वस्तिवाचनं कारयेदिति
अर्थः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमात् ह्रदात् मृत्तिकां रोचनां गंधं गुग्गुलं चाप्सु निक्षिपेत् १ याश्चाहृता
एकवर्णैश्चतुर्भिः कलशैर्ह्रदात् चर्मण्यानडुहे रक्ते स्थाप्यं भद्रासनं ततः अनडुहं चर्मैव प्राग्रीवमूर्ध्वलोमाव
स्थाप्यमिति विज्ञानेश्वरः याश्चापः ते चत्वारोपि कलशा भद्रासनस्य पूर्वादिचतुर्दिक्षु स्थाप्या इति सांप्रदायिकाः पू
र्वादिदिक् क्रियावस्थितकलशोदकेनाभिषेकः क्रममंत्रानाह सहस्राक्षं शतधारमृषिभिः पावनं कृतं तेन त्वामभि
षिंचामि पावमानीः पुनंतु ते १ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः २ य
त्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ललाटे कर्णयोरक्ष्णोरापस्तच्छ्नंतु ते सदा ३ सहस्राक्षं बहुशक्तिकं पावमा
नीरित्यनंतरमाप इति शेषः भगं कल्याणं दौर्भाग्यमकल्याणं उदग्दिगवस्थितेनाभिषेके पूर्वोक्तास्त्रयपवमंत्राः सर्व
श्चतुर्थमिति विज्ञानेश्वरोक्तलिंगात् किं च स्नातस्य सार्षपं तैलं स्रुवेणौदुंवरेण तु जुहुयान्मूर्धनि कुशान् सव्येच परि

गृह्याच सव्यपाणिगृहीतकुशांतरितेनसार्षपतैलं उदुंबरनिर्मितेनस्रुवेणयजमानमूर्द्धनिजुहुयादाचार्यः मित
स्वस्तमितश्चैवतथाशालकटंकटौकूष्मांडोराजपुत्रश्चत्यंतेस्वाहासमन्वितैः १ नामभिर्वलिमंत्रैश्चनमस्कारसम
न्वितैः नमःस्वस्तिस्वाहेतिचतुर्थीएतानिचषट् विज्ञायकनामानीति विज्ञानेश्वरः अपरार्कस्तुशालकटंकटइत्येकवच
नंपपाठ तेनतन्मतेपंचैवाहुतयोभवंति अत्रलौकिकेग्नौस्थालीपाकविधिनाचरुंकृत्वानेभ्योपवाहुतिषट्कंहुत्वेंद्रादि
दृग्पालोकपालेभ्यस्तत्तन्नाम्नावलिंदद्यादितिमिताक्षरायां तत्रचरुहोमेंद्रादिभ्योवलिदानेचमूलेचिंत्यं अंतेस्वाहा
समन्वितैर्नामभिर्जुहुयात् नमस्कारसमन्वितश्चमितादिभ्योवलिंदद्यादितिवचनमाणेनसंबध्यतइतितुयुक्तं दध्या
चतुष्ष्यंस्सर्पिकृशरान्नालीर्यसर्वशः कृताकृतांस्तंडुलांश्चपललौदनमेवच । मत्स्यान्पक्कांस्तथैवामान्मांसमेतावदेव
वतु पुष्पंचित्रंस्रगंधंचसुरांचत्रिविधामपि २ मूलकंपूरिकापूपास्तथैवोंडेरकास्रजः दध्यान्नंपायसंचैवगुडपिष्टं
समोदकं ३ एतान्सर्वान्समाहृत्यभूमौकृत्वाततःशिरः कृताकृतान्सकृदवहतान् पललौदनः तिलपिष्टमिश्र
ओदनमितिमिताक्षरायां अपक्कमांसमिश्रओदनमितितुयुक्तं पललंक्रव्यमामिषंइतिकोशात् आमानकापक्का
न् मांसमेतावदेवतुपक्कमपक्कमांसमन्यादित्यर्थः त्रिविधासुरागौडीपैष्टीमाचमूलकं कंदाकरोमत्तविशेषइति
मिताक्षरायां स्वरूपइतियाज्ञमेवतुयुक्तं उभयमितियाज्ञमितिमहार्णवे अपूपाःस्नेहपक्कागोधूमविकाराइति
विज्ञानेश्वरः उंडेरकापिष्टविकारास्तेनानाविधाप्रोक्ताः स्रजइत्युच्यंते गुडपिष्टंगुडमिश्रंशाल्यादिपिष्टं अत्रसुरामां
सचाःब्राह्मणविषयं ब्राह्मणैस्तुमांससुरास्थानेसलवणंपायसंदुग्धंचयाह्यं पायसलवणोपेतंमांसस्थानेप्रक

ल्पयेत् दुग्धंलवणसंमिश्रंसुरास्थानेप्रकल्पयेदितिस्मरणादितिमहार्णवादिषुविनायकांबिकागायत्रीभ्यांविना
यकमंबिकाचनमस्कृत्यपूर्वोक्तद्रव्यजातं तयोरग्रतउपहृत्यतच्छेषंसूर्पेनिधायचतुष्पथेसूर्पंसंस्थाप्यबलिंदद्यादे
तैर्मंत्रैः बलिंग्रहंत्विमंदेवाश्चादित्यावसवस्तथा मरुतोथाश्विनौरुद्राः सुपर्णाः पन्नगाग्रहाः असुरायातुधा
नाश्चपिशाचामातरोरगाः शाकिन्योयक्षवेतालाःयोगिन्यःपूतनाशिवा २ जंभकासिद्धगंधर्वानागाविद्याधरा
नगाः दिक्पालालोकपालाश्चयेचविघ्नविनायकाः ३ जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः माविघ्नंमाचमे
पापंमासन्तुपरिपंथिनः ४ सौम्याभवंतुतृप्ताश्चभूताप्रेताःसुखावहाः इत्यादिस्मृत्यापिदेहलीदीपवदन्वेति विना
यकस्यजननीमुपतिष्ठेत्ततोंबिकां दूर्वासर्षपपुष्पाणांदत्वार्घ्यंपूर्णमंजलिं ५ अनंतरंविनायकमंबिकांचदूर्वा
द्यर्घ्यमंजलिंचदत्वोपतिष्ठेतउपस्थानमंत्रमाह रूपंदेहिमेभगवन् भगमित्युक्तविनायकमप्युपतिष्ठेतेतिविज्ञा
नेश्वरः अत्रमदनः विनायकोपस्थानंकृत्वांबिकोपस्थानंकार्यमित्याह ततःकिंचशुक्लांबरधरः शुक्लमाल्यानु
लेपनः ब्राह्मणान् भोजयेदद्याद्वस्त्रयुग्मंगुरोरपि गुरोराचार्यस्यअपिशब्दः दक्षिणामपि एवंविधंकर्मकुर्वतः
फलमुक्तं एवंविनायकंपूज्यग्रहांश्चैवविधानतः कर्मणांफलमाप्नोतिश्रियमाप्नोत्यनुत्तमां १ अस्यांकर्मांगत्वेनच
वर्णचतुष्टयस्याप्यत्राधिकारः शूद्रस्यतुमंत्रवर्ज्यंतान् प्रकृत्यमंत्रवर्ज्यंनदुष्यति कुर्वाणःपौष्टिकीक्रियामितिमो
क्षधर्मश्रवणात् महार्णवेपि यजमानस्तुशूद्रश्चेदितिवदन् तस्याधिकारमभिप्रैति इतिविनायकशांति अ
थप्रयोगः कर्त्तादेशकालौसंकीर्त्यविनायकोपसर्गनिवृत्त्यर्थममुककर्मणोनिर्विघ्नतासिध्यर्थंवाविनायकस्ना

ग्रो॰म॰ पनंकरिष्यइतिसंकल्पयेत् ततः पुण्याहवाचनंनांदिश्राद्धंतंयथोक्तंकुर्यात् अपरेपुण्याहवाचनंनेच्छति अ
ग्रेतस्यकर्त्तव्यत्वात् अथाचार्यऋत्विक् चतुष्टयंचवृणुयात् ऋत्विजोनसंतीतिकेचित् तदाचार्यएववक्ष्यमाणाम
५ भिषेकंकुर्यात् यजमानः प्रतिमास्वक्षतपुंजेषुवाशिवंपार्वतींगणेशं वसुदेवंकेतुंअर्कंभौमंशुक्रंगुरुंबुधंशनिं
5 चंद्रंराहुंस्कंदंक्रमस्मावाह्यपूजयेत् अथाचार्यःपंचवर्णचूर्णैः पूर्वादिचतुर्दिक्षुचत्वारिमध्यस्यवेद्यांचैकमिति॰
स्वस्तिकपंचकमालिख्यमध्यस्थस्वस्तिकोपर्यानेडुहं रक्तंचर्मप्राचीन् ग्रीवमूर्ध्वलोमंसंस्थाप्यतस्योपरि श्रीपर्णीपी
ठंसंस्थाप्यसितेनवाससासंछादयेत् एतद्भद्रासनमितिचतुर्षुस्वस्तिकेपूर्वादिदिक्षुचत्वारोपिऋत्विजःकलशान्॰
स्थापयेयुः आचार्योवा अत्रायंप्रकारः महीद्यौःपृथिवीचनेतिभूमिस्पृशन्संप्रार्थ्य ओषधयः समितियवान्क्षि
प्त्वा आकलशेषिनितेषुकलशान्संस्थाप्य इमंमेगंगेतितीर्थोदकेनापूर्यगंधद्वारामितिचंदनादिअगरुकस्तूरीक
र्पूरगोरोचनादीन् गंधान् गुग्गुलंचनिक्षिपेत् अथाऔषधिरितिसर्वौषधीः ओषधयः समितियवान्कांडात्कांडा
दितिदूर्वा अश्वत्थेवइतिपंचपल्लवान् स्योनापृथिवीत्यनेन उद्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेहरमे
पापयन्मयादुष्कृतंकृतं इत्यनेनपंचमृदःक्षिपेत् याःफलिनीरितिफलं सहिरत्नानिइतिपंचरत्नानि हिरण्यरूप
मितिहिरण्यंयुवासुवासाइत्यनेनवस्त्रं रक्तसूत्रेणचवेष्टयेत् पूर्णादर्वीतिधान्यपूर्णपात्रंकलशोपरिनिदध्यात् ।
अत्रचवरुणावाहनपूजनेभिकेचिदाहुः ततःकलशेसर्वेसमुद्राइतिगंगाद्यावाहनंततःकुंभाभिमंत्रणं कलश
स्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः । कुक्षौतुसागराः सप्तसप्तद्वीपा

वसुंधरा: ऋग्वेदोथयजुर्वेदः सामवेदोप्यथर्वणः २ अंगैश्चसहिताः सर्वे कलशंतुसमाश्रिताः ३ इति ततः कुं
भप्रार्थना देवदानवसंवादेमथ्यमानेमहोदधौ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं १ त्वत्तोयेसर्वतीर्थानिदे
वासर्वेत्वयिस्थिताः त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रतिष्ठिताः २ शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापति ।
आदित्यावसवोरुद्राविश्वेदेवाःसपैतृकाः ३ त्वयितिष्ठंतिसर्वेपियतः कामफलप्रदा त्वत्प्रसादादिमंयज्ञंकर्तु
मीहेजलोद्भवः ४ सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति ततऋत्विजआनोभद्राइतिशांतिसूक्तंपठेयुरितिके
चित् आनोभद्रेतिशांतिसूक्तस्यराहुगणोविश्वेदेवास्त्रिष्टुप् आद्यापंचमीसप्तमीचजगत्योषष्ठीविराट्शेषास्त्रिष्टुभः
शांतिसूक्तजपेविनियोगः आनोभद्राःशन्नोवातः पवतांमित्यादिकांवातस्मिन्नेवसमये आचार्योभद्रासनस्यो
त्तरतईशान्यांवावस्त्राच्छादितपीठादौविनायकप्रतिमामंबिकाप्रतिमांचाग्न्युत्तारणपूर्वकप्रतिष्ठाप्यषोडशोपचा
रैः पूजयेदितिनिबंधकृतः तत्रविनायकमंत्रः गणानांत्वागृत्समदोगणपतिर्जगतीगणपत्यावाहनेविनियो
गः ॐगणानांत्वा तत्पुरुषायविद्महेवक्रतुंडायधीमहितन्नोदंतिःप्रचोदयादितिवा गौर्यामंत्रः गौरीर्मिमायदीर्घतमा
उमाजगतीगौर्यावाहनेविनियोगः गौरीर्मिमायसुभगायैविद्महेकाममालिन्यैधीमहि तन्नोगौरीप्रचोदयादिति ॥
अत्रमितित्वरायांचरुहोमो । मुक्तः शिष्टाश्च कुर्वंतितस्मिन्पक्षेआचार्योगृह्योक्तविधिनाकुंडेस्थंडिलेवाग्निंप्रति
ष्ठाप्य प्रादेशमात्रंसमिधमादायास्मिन्होमेदेवतापरिग्रहार्थमन्वाधानंकरिष्यइतिसंकल्प्यचक्षुषीआज्येनेत्यंतमुक्त्वा
अत्र प्रधानमितसंमितंशालकटंकटंकूष्मांडंराजपुत्रमेताः प्रधानदेवताः एकैकयाचर्वाहुत्यायक्ष्येशेषेणस्विष्ट

शां॰ म॰
९

कृतमित्यादिउक्त्वाग्रावादध्यात् अपरार्कमंत्रेनतपंचैवाहुतयस्तन्मंत्रेनान्वाधानेहोमहयेचतथैवानुसंधेयं ततःपरि
समूहनादिचरक्षापनांतंकृत्वागोमूत्रलोलीकृतेनगोरसर्षपकल्केनोद्वर्तितांगंसर्वौषधीचूर्णैः कस्तूरिकागरुचंद
नाद्यैर्विलिप्तशिरसंयजमान-माचार्योभद्रा सनउपवेशयेत्ततोयजमानः स्वस्तिवाचनंकुर्यात् अनंतरंरूपगुण
शालीभिः सुवासिनीभिर्नीराजनंकारयेत् ततोभद्रासनात्पूर्वदेशावस्थितंकलशमादायाभिषिंचयेदाचार्यः मंत्र·
स्य सहस्राक्षंशतधारमृषिभिः पावनंकृतं तेनत्वामभिषिंचामिपावमानीः पुनंतुमे १ ततोदक्षिणदिशावस्थितंकल
शमादाय भगंतेराजावरुणोभगंसूर्योबृहस्पतिः भगमिंद्रश्चवायुश्चभगंसप्तर्षयोविदुरितिअनेनाभिषिंचेत् ततः
पश्चिमदिगवस्थितकलशमादाय यत्तेकेशेषुदौर्भाग्यंसीमंते यच्चमूर्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुतेसदेति
ततः उदग्दिशावस्थितंकलशमादायपूर्वोक्तैस्त्रिभिर्मंत्रैरभिषिंचेत् बृहत्पराशरेणाप्येषिमंत्रउक्तः यत्तद्वैपायनंस्ना
नं सहस्राक्षमृषिस्मृतं तेनत्वांशतधारेणपावमान्यःपुनंतुमां शाक्रादिदशदिक्पालाब्रह्मेशकेशवादयः आपस्ते
घ्नंतुदौर्भाग्यंशांतिर्योऽस्तुसर्वदा २ समिध्यानश्चापश्चौषधः संतुदुर्मित्रियास्तस्मैसंतुयोऽस्मान्द्वेष्टियंचवयंद्विष्मः २ स
समुद्रागिरयोनद्योमुनयश्चपतिव्रताः दौर्भाग्यंघ्नंतुतेसर्वेशांतिर्यच्छंतिसर्वदा ३ पादगुल्फोरुजंघादौनेत्रेचोदर
नाभिषु स्तनोनुवाहहस्ताग्रग्रीवांसांत्रिसंधिषु ४ नासाललाटकर्णभ्रूकेशांतेषुचयत्स्थितं तदापोघ्नंतुदौर्भाग्यं १
शांतियच्छंतुसर्वदा ५ इत्येतैरभिषिंचेदितिकेचित् चतुष्कलशाभिषेचनेसप्तवपत्नीयाः अथाचार्योयजमानस्य
पश्चिमतस्तिष्ठन् सव्यपाणिगृहीतकुशांतर्हितयजमानशिरसिश्रीऔदुंबरेणस्रुवेणसार्षपंतैलंजुहुयात् अंमिता ९

6

यः स्वाहा यजमानो मितायेदं न मम मे तिम्मजे दिमेवं सर्वत्रापि उसंमिताय स्वाहा ॐ सालायाः ॐ कटंकटाय ॐ कूष्मांडा
य ॐ राजपुत्रायेति अथाचार्योऽग्निमर्चनाद्याज्यभागांतं कृत्वा ग्रहहोमं कुर्यात् चरूणां मितादिभ्य एवं जुहुयात् यजमानोऽस्तु
पूर्ववद्यजेत् आचार्यः स्विष्टकृतादि प्रणीताविमोकांतं कर्मशेषं समापयेत् यजमानस्त्वभिषेकशालायामिंद्रादिदश
लोकपालेभ्यो नामादि दत्त विदिक्षु च बलिं दद्यात् एतान्निरग्निस्थापनचरुहोमादिकान् बलिदानांतान् मितादीनामनु
रुध्योक्तानि ततो मिताय एष बलिर्न मम इति पायसेन माषभक्तेन वा मितादिभ्यो बलिं दत्वा विनायकांबिकयोरग्रतः सकृद्व
हृततंडुलानां मांसेन तिलपिष्टेन वा मिश्रमोदनं मत्स्यमांसं पक्वमपक्वं च गौडीं पैष्टीं माध्वीं इति त्रिविधां सुरां स्रग्वाराणस्यमांस
स्थाने सलवणं पायसं सुरास्थाने सलवणं दुग्धं चित्रं पुष्पं सुगंधि द्रव्यं मूलकं पूरिकाः अपूपाः इंडेरकस्रजः दध्यन्नं पा
यसं गुडमिश्रं तंडुलादिपिष्टं मोदकांश्च पात्रे संस्थाप्य तत्पुरुषाय विद्महे इति मंत्रेण विनायकाय सुभगायै विद्महे इति
मंत्रेणांबिकायै निवेदयेत् अथाचार्यो नूतनं शूर्पे सर्वमुपहिरशेषं संस्थाप्य चतुष्पथं गत्वा तत्र गोमयेनोपलिप्य कु
शानास्तीर्य शूर्पं प्राङ्मुखं स्थापयेत् यजमानश्चैतैर्मंत्रैर्बलिं दद्यात् बलिं गृह्णंत्विमं देवा आदित्या वसवस्तथा मरुतोऽश्वि
नौ रुद्राः सुपर्णाः पन्नगाः ग्रहाः १ असुरा यातुधानाश्च पिशाचा मातरोरगाः शाकिन्यो यक्षवेताला योगिन्यः पूतनाः
शिवाः २ जंभकाः सिद्धगंधर्वा नागा विद्याधरा नगाः दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ३ जगतां शांतिकर्ता
रो ब्रह्माद्याश्च महर्षयः मा विघ्नं मा च मे पापं मा संतु परिपंथिनः ४ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहाः इति
देवादित्यवसुमरुतदश्विरुद्रसुपर्णपन्नगग्रहासुरयातुधानापिशाचमातृउरगशाकिनीयक्षवेतालयोगिनीपूतना

शां·मं·

७

शिवजृंभकसिद्धगंधर्वनागविद्याधरगणदिक्पाललोकपालविघ्ननायकजगच्छांतिकर्तृब्रह्मादिमहर्षिभूतप्रेतेभ्यश्चेदं
नममेतित्यागः ततः यजमानगृहमागत्यक्षालितपाणिपादो विनायकनिकटे आगत्य उत्तरपूजनं कृत्वा शिरसा भूमिंग।
त्वा पुष्पयुतेन मर्घ्यं तत्पुरुषायेति मंत्रेण विनायकायार्घ्यं दद्यात् ततो दूर्वासर्षपपुष्पाणां पूर्वोक्तविनायकबलिं दद्यात् अंवि·
कायै तन्मंत्रेण तथैव दद्यात् ततो विनायकमंबिकां चोपतिष्ठेत् मंत्रस्तु रूपं देहि यशो देहि भगं भगवति देहि मे पुत्रान्
देहि धनं देहि सर्वान् कामांश्च देहि मे १ अस्मिन् भगं भगवन् देहि इत्युपस्थ विनायकमुपतिष्ठेत् अनंतरं यजमानः प्राङ्मुखोप
विष्ट उदङ्मुखानाचार्यादीन् पूजयित्वाचार्याय वाससो युग्मं रूप्यांजलिमप्यन्येभ्यो यथाशक्तिदक्षिणां दद्यात् ततउत्तिष्ठ ब्रह्म
णस्पते इत्यनेन यांतु देवगणा इत्यनेन विनायकमंबिकांचोपस्थाप्य विसृज्य प्रतिमादि सर्वां सामग्रीमाचार्याय दद्यात् त·
तो यथाशक्ति भूयसीं दक्षिणादीनानाथेभ्यो दत्वा यथाशक्ति विनायकप्रीतये च ब्राह्मणान् भोजयित्वा संकल्प्य वा यथास्वत्वे·
त्याद्युक्तान्यूनातिरिक्तं सर्वं संपूर्णमस्त्विति तान्संप्रार्थ्य तैरनुज्ञातः सुहृद्युतो भुंजीत इति मच्छंकरभट्टसूरिसुतभट्टनीलकंठ
कृते भास्करे शांतिमयूखे विनायकशांतिपद्धतिः अथ ग्रहयज्ञः स्कांदे देवदानवगंधर्वा यक्षराक्षसकिन्नराः पीड्यंते ग्रह·
पीडाभिः किंपुनर्भुवि मानवाः १ शनैश्चरेण सौदासो नरमांसे नियोजितः राहुणा पीडितो राजा नलो भ्रांतो महीतले २ अं·
गारकनिरोधेन रामो राष्ट्रान्निवासितः अष्टमेन शशांकेन हिरण्यकशिपुर्हतः ३ रविणा सप्तमस्थेन रावणो विनिपातितः
गुरुणा जन्मसंस्थेन हतो राजा सुयोधनः ४ पांडवा बुधपीडायां विकर्मणि नियोजिताः षष्ठेनोशनसा युद्धे तितः ५ एते·
चान्ये च बहवो ग्रहदोषैस्तु पीडिताः याज्ञवल्क्यः ग्रहाधीना नरेंद्राणामुच्छ्रायाः पतनानि च भावाभावौ च जगतस्तस्मा

७

त्पूज्यतमा ग्रहाः १ प्रयोगपारिजाते उत्पलपरिमलोकार्यारंभेषु सर्वेषु प्रतिष्ठास्वध्वरेषु च नववेश्मप्रवेशे च
गर्भाधानादिकर्मसु १ आरोग्यस्नानसमये संक्रान्तौ रोगसंभवे अभिचारे च यः कुर्याद्ग्रहपूजाविधानतः २ सोभीष्टफ
लमाप्नोति निर्विघ्नेन न संशय इति याज्ञवल्क्यः श्रीकामः शांतिकामो वा ग्रहयज्ञं समाचरेत् वृष्ट्यायुःपुष्टिकामो वा त
थैवाभिचरन्नपि मात्स्ये ग्रहयज्ञास्त्रिधा प्रोक्ताः पुराणश्रुतिकोविदैः १ प्रथमो युतहोमस्स्याल्लक्षहोमस्ततः परं २
तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः १ ग्रहस्योत्तरपूर्वेण मंडपं कारयेद्बुधः २ रुद्रायतनभूमौ वा चतुरस्रमुद
क्प्लवं दशहस्तमथाष्टौ वा हस्तान् कुर्याद्विधानतः ३ तस्य द्वाराणि चत्वारि कर्तव्यानि विचक्षणैः स्कांदे नवग्रहमखे
कुंडं हस्तमात्रं समं भवेत् चतुरस्रमधोहस्तं योनिवक्त्रं समेखलं १ योनिर्वक्त्रं कं यस्य तत् पुत्रादिकामनायां तु यान्या
न्याकारा भवंति चतुरंगुलविस्तारा मेखला तद्वदुच्छ्रिता अत्र विशेषोपदेशादेकैव मेखला मात्स्ये वितस्तिमात्रा योनिः
स्यात् षट्सप्तांगुलविस्तृता कूर्मपृष्ठोन्नता मध्ये पार्श्वयोरंगुलोच्छ्रिता १ गजोष्ठसदृशी तद्वदायताच्छिद्रसंयुता मे
खलोपरि सर्वत्र अश्वत्थदलसन्निभा २ एवं कुंडं च मंडपेशानभागमुदीच्यां वेति हेमाद्रिः अयुतादिहोमं प्रकृत्य वशिष्ठ
स्तु कुंडं तन्मध्यभागस्थं कारयेच्चतुरस्रकं कुंडस्येशानभागे तु पूजावेदिं प्रकल्पयेदित्याह अत्र चतुरस्रमित्यनेन वृत्तत्रि
यादिपुरस्कारेण विहितानामाकारविशेषाणां त्रिपुरस्कारेण विहितस्य योन्याकारस्य निवृत्तिः योनौ पुत्राः ग्रुभं दले द्वाभ्यां
इत्याद्याः काम्यास्त्वाकारा भवंत्येव वेधांविषमाह गोभिलः कुंडस्य प्रागुदीच्यां वा प्राच्यामुत्तरतोपि वा चतुरस्रं चतुर्हो
रकर्तव्यं ग्रहपीठकं १ श्रीकामः पूर्वतः कुर्यात्पुष्ट्यर्थं दक्षिणेन तु पश्चाद्द्विजन्मसिद्ध्यर्थं शांत्यर्थं चोत्तरेण तु २ ईशान्यां स

शां॰म॰ वैकामायत्वाग्नेयीत्वभिचारके नैऋत्यां पुत्रलाभाय पुष्ट्यर्थं वायवेन तु इति वेदी तु स्थंडिलपक्षेपि कार्या वसिष्ठः लिखे
दष्टदलं पद्मवेदिकोपरि तंडुले अत्रैकाग्निब्रह्माचार्यपक्षमुक्तास्तेषां नवसंख्या कुंडेषु तन्नत्रहाकारा स्वाह प्रयोगपरिजा
८ ते भगवान् मनोरमे शुचौ देशे होमशालामलंकृतां कृत्वा तु संवृतां प्राज्ञो ग्रहस्थानं प्रकल्पयेत् १ तन्मध्ये भास्करस्था
नं भवेत् पूर्वोत्तरे बुधः पूर्वस्मिन् भार्गवस्तोस्थानं सोमो दक्षिणपूर्वके २ दक्षिणस्यां कुजस्थानं राहोर्दक्षिणपश्चि॰
8 मे शनेश्च पश्चिमस्थानं केतोरुत्तरपश्चिमे ३ उत्तरस्यां गुरोः स्थानं एवं च स्थंडिलं भवेत् स्थंडिलमत्स्यार्थे भास्करस्य तु॰
वृत्तं स्याच्चंद्रस्य चतुरस्रकं कुजस्य तु त्रिकोणं स्याद्बाणाकारं बुधस्य तु ४ गुरोर्दीर्घं च तुष्कोणं पंचकोणं सितस्य तु चा
पाकारं शनेः राहोः शूर्पं केतोर्ध्वजाहृति ५ नवधा विभजेदग्निं श्रौतकर्मविधानतः ऋत्विजश्च यथायोग्यं कुंडेषु ब्राह्मणाः
पृथक् ६ अथ स्त्रुवेज्जुहुयात् सूर्यपावककद्रकान् ऋत्विजो जुहुयुः सर्वेश्च वैरोगवपृथिक् पृथक् ७ अष्टौ च कलशा॰
न् गृह्य समारोपणमग्निषु प्रधानाग्नौ विधायेमानि तं होमं समाचरेदिति ८ अत्रैव स्थंडिले भवेदित्यनेन स्थंडिलानां
कुंडानां च समस्त्राकारत्वं तद्दिक्तनिवेशश्चोक्तः ब्राह्मणपृथगित्यनेन चाचार्यात्रवब्राह्मणाश्चेत्युक्तं अत्राथ संक्षेपः प्र
योगपारिजाते मध्यकुंडे स्मार्ताग्निं प्रणीयत्ततोन्त्वाचार्यौः अष्टसुकुंडेषु अग्निं प्रणीयाज्यभागांते काद्दिमिद्ध्वं गुडोदना
दिहविर्भिराज्येन चग्रहादिमंत्रैर्हुत्वास्विष्टकृदादिहोमशेषं कृत्वा पूर्णाहुतिर्जुहुयुरिति कुंडमत्स्याः स्कांदे तस्य चोत्तरपू
र्वे स्थंडिलं हस्तिमात्रकं त्रिवप्रं चतुरस्रं च वितस्त्युच्छ्रयसंमितं स्थंडिलं वेदिः वप्रो मेखलाः मात्स्ये द्व्यंगुलोच्छ्रित
वप्रः प्रथमः समुदाहृतः अंगुलोच्छ्रायसंयुक्तं वप्रद्वयं तथोपरि द्व्यंगुलस्तत्र विस्तारः सर्वेषां कथितो बुधैः १ ततश्च

हानाहयाज्ञवल्क्यः सूर्यसोमोसोमपुत्रोबृहस्पतिः शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः स्कांदे न
वग्रहमखंकुर्यात् ऋत्विजश्चतुरोशुभान् अथवाचैकमभ्यर्च्य विधिनाब्राह्मणांस्तथा नवग्रहमखेविप्रा
श्चत्वारोवेदवादिनः अथवाऋत्विजोशांतोद्वावेवश्रुतिकोविदौ ।१ द्वावेवाहित होमेतुनप्रशस्यन्तविस्तरे ३
ति त्रिविधमपिनवग्रहमखमुपक्रम्यवसिष्ठस्तु षोडशब्राह्मणान् दंभान्तविवर्जितान् तेषांमध्येश्रेष्ठतमं समाचा
र्यंतंप्रकल्पयेदिति अत्रपारिजाते नवाआचार्यएकोब्रह्माषडृत्विजः आचार्येभ्योनवभ्यश्चग्रहार्चनफलं
यतश्श्रुतेः आचार्यकर्मएकएवकुर्यात् यतोत्वत्वारमभमात्रं खेन्वाद्यायाग्रहदक्षिणा अपिएकस्यैवदेयाऽस्यायुक्तं
तदुक्तं उपक्रमेएकाचार्यश्रुतेराचार्याणामाचार्यसमुदायप्राणवहुपदघातीतिवत् लिंगसमवायमात्रेणानव
भ्युदयस्तुपसंहारस्यपदोपपत्तेः उपक्रमेपि यद्यथाचार्यस्यसंस्कार्यत्वेनैकत्वमविवक्षितं तथाप्याचार्यस्यभूतभा
व्युपयोगभावात्संस्कार्यत्वानुपपत्तेः वृतआचार्यः स्वकर्मकुर्यादितिकल्पतेवाक्यउपादेयत्वादाचार्यस्यभवत्ये
वैकत्वविवक्षितं उपपादितंचेदंमध्वर्युंवृणीतेहोतारंवृणीतेपुरोहितंवृणीतमित्यत्रमिश्रैः जन्मभूर्गोत्रमग्नि
श्चवर्णाः स्थानमुखानिचयोज्ञात्वाकुरुतेशांतिर्ग्रहास्तेनावमानिताः तत्रवर्णजन्मनीआह दामोदरीयेवृद्धप
राशरः आरक्तकश्यपोभानुः शुक्लोब्रह्मसुतःशशी रक्तोरुद्रसुतोभौमः पीतःसोमसुतोबुधः १ पीतोब्रह्मसुरा
चार्यः शुक्लःशुक्रोभृगूद्भवः कृष्णःशनिरविपुत्रः कृष्णोराहुःप्रजापतेः २ कृष्णःकेतुःकृष्णमृत्युः कृष्णापापाहस्त्र
योप्यमी स्कांदे उत्पन्नोऽर्कःकलिंगेषुयमुनायांचचंद्रमाः अंगारकस्त्ववंत्यायांमगधायांहिमांशुजः १ सैंध

ग्रां·मु· वेषुगुरुर्ज्ञानः शुक्रोभोजकटेतथा शनैश्चरस्तुसौराष्ट्रेराहुर्वैराटनीपुरे २ अंतर्वेद्यांतथाकेतुरित्येताग्रहभूमयः
यस्ययस्यचय त्क्षेत्रंतेनैवह्यामृतःपरं ३ आदित्यः काश्यपेगोत्रेआत्रेयश्चंद्रमाभवेत् भारद्वाजोभवद्भौमस्तथात्रेयश्च
९ सोमजः ४ शुक्रःपूज्योंगिरोगोत्रः शुक्रोवैभार्गवस्तथा आनिःकाश्यपःपवाच्यराहुः पैठीनसीस्तथा ५ केतवोजे
9 मिनीयाश्चग्रहाग्निस्तदनंतरं आदित्यः कपिलोनामपिंगलःसोमउच्यते ६ धूम्रकेतुस्तथाभौमोजठराग्निर्बुधःस्
स्मृतः गुरोश्चैवशिखीनामशुक्रोभवतिहाटकः ७ शनैश्चरोमहातेजाः राहुकेत्वोर्हुताशनः ८ एतानिग्रहविशे
षतोग्निनामानि कर्मविशेषतोपिदेवीपुराणे शुभोग्रहविधोसग्निर्लक्षहोमेपराजितः कोटिहोमेशिवोवह्निःस
र्वकामप्रदायकः १ क्वचित् लक्षहोमेतुवह्निःस्यात् कोटिहोमेहुताशनः इति स्कांदे भास्करांगारकौरक्तोश्वे
तौशुक्रनिशाकरौ सोमपुत्रोगुरुश्चैवतावुभौपीतकौस्मृतौ १ कृष्णंशनैश्चरंविद्याद्राहुंचित्रांश्चकेशवः मध्येतु
भास्करंविद्यात्कृशिनंपूर्वदक्षिणे २ दक्षिणेलोहितंविद्यांद्बुधंपूर्वोत्तरेणतु उत्तरेणगुरुंविद्यात् पूर्वेणैवतु
भार्गवं ३ पश्चिमेचशनिंविद्याद्राहुंदक्षिणपश्चिमे पश्चिमोत्तरतःकेतुः स्थाप्यावैशुक्लतंडुलैः ४ अथवावर्णकैः
कार्याः कार्याःस्वर्णादिधातुभिः ५ याज्ञवल्क्यः ताम्रकात् स्फाटिकाद्रक्तचंदनात् स्वर्णजावुभौ रजतादयस
सीसात्कांस्याःकार्याःग्रहास्तथाः १ वसिष्ठः यथारुचिंप्रमाणेन प्रतिमाःकल्पयेत्सुधीः अत्रसर्वत्रग्रहाणां
सूर्यादिक्रमःस्पष्टः बौधायनोक्त सूर्यांगारकशुक्रचंद्रबुधगुरुशनयस्त्वाह स्कांदे भानुंतुमंडलाकारंसोमंतु
चतुरस्रकं अंगारकंत्रिकोणंचबुधंबाणाकृतंतथा १ दीर्घांचचतुरस्रंचगुरुंपंचास्रंभार्गवंतथा धनुस्तुल्यपा ९

निर्विघ्याद्याकृतं सूर्याकृतिंतथा २ ध्वजाकारःकेतवस्त्वगणेशं तत्ररूपिणं रूपिणंहस्तपादाद्यवयवयुक्तंस्थापये
त् शुक्लतंदुलैर्वर्णकैर्लेख्याइत्येतत्पत्तयोर्मंडलाद्याकारनेतिहेमाद्रिः तत्रैव शुक्रार्कौ प्राङ्मुखौप्रत्यङ्मुख एव·
शनिः सोमःशेषाद्दक्षिणतोमुखाः इदंचशुक्रादीनां प्राङ्मुखत्वादिआदित्याभिमुखाः सर्वइतिमात्स्योक्तादित्याभि
मुखत्वेनविकल्पने यत्तुहेमाद्रिविकल्पपरिजिहीर्षया प्राङ्मुखाऊर्ध्वदृष्टीरुदङ्मुखोवामदृष्टीप्रत्यङ्मुखोधोदृष्टीद
क्षिणतोमुखाः दक्षिणदृष्टयइतिव्याचष्टतत्रमूलंचिंत्यंविरोधनाद्वस्त्यंचवर्णगुणैर्युक्तान् व्याहृत्यावाहयेत्तता
न् मात्स्ये प्रणम्याग्निविप्रकथितेनकृत्वाब्राह्मणवाचनं अग्निप्रणयनंकृत्वाविद्यामावाहयेत्सुरान् १ देवानांतत्र
संस्थाप्यविंशतिद्वादशाधिकाः आदित्याभिमुखाः सर्वेसाधिपत्यधिदेवताः २ विष्णुधर्मोत्तरे अतःपरंप्रवक्ष्या·
मियोदेवोयोग्रहःस्मृतः अग्निरर्कःस्मृतः सोमोवरुणःपरिकीर्तितः १ अंगारककुमारस्तुबुधस्तुभगवान्हरिः।
बृहस्पतिःस्मृतःशक्रःशुक्रोदेवीचपार्वती २ प्रजापतिःशनिश्चैवराहुर्दैत्योगणाधिपः विश्वकर्मास्मृतःकेतु·
र्येग्रहाश्चेश्वराःस्मृताः ३ अतएवाग्न्यादिलिंगकामंत्राः सूर्यादिस्थापनंउक्तंकांडे अग्निंदूतंदिनेशायसूर्यासंतइ
त्यपि स्योनापृथिवीभौमायइदंविष्णुर्बुधायच १ इंद्राग्नीमासाहेरेज्यायशुक्रंज्योतिःसितायच प्रजापतेतिसौराय·
आपोगौरीतिराहवे २ केतवेब्रह्मजज्ञानेस्वैस्वैर्मंत्रैः प्रतिष्ठिताः एतेषांमंत्राणांचव्याहृत्यावाहयेत् तानीत्युक्ताभि·
र्व्याहृतिभिरावाहनेविकल्पः मदनरत्नावाहनस्थापनयोर्भेदाद्व्याहृतिभिरावाहनं एतैर्मंत्रैःस्थापनमित्युचे·
पारिजाते वामनस्तुप्रणवेत्यादितः कृत्वाभूर्भुवःस्वःततःपरं चतुर्थ्यानामसंयुक्तंनमस्कारात्रयोजितं १ एष

ग्रो॰ म॰
१०

मंत्रः समाख्यातो ग्रहपूजाविधायकः अनेनैवाहनं कुर्यादनेनैव विसर्जनमित्यूचे २ अथावाहनवाक्येषु विशे-
षमाहः बोधायनः किरीटिनं पद्मासनं पद्मकरं पद्मगर्भसमद्युतिं सप्ताश्वं सप्तरज्जुं कलिंगदेशजं काश्यपगोत्रं वि-
श्वामित्रार्षं त्रिष्टुप्छंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्तगंधानुलेपनं रक्तध्वजपताकोपशोभितं मुकुटकेयूरम-
णिशोभितं आरूढरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमध्ये प्रविष्टम् अधिदेवता अग्निसहितं रक्तवृत्तमंडले पूर्वमुख-
मादित्यमावाहयामि किरीटिनं रक्तमाल्यांबरं रक्तशूलगदाधरं चतुर्भुजं मेषगमनं अवंतिदेशजं वासिष्ठगोत्रजं ज-
मदग्न्यार्षं जगतीछंदसं रक्तांबरधरं रक्ताभरणभूषितं रक्तमाल्यानुलेपनं रक्तछत्रध्वजपताकिनं मुकुटकेयूरम-
णिशोभितं आरूढरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं मंडले प्रविष्टम् अधिदेवताभूमिसहितं प्रत्यधिदेवतास्कंदस-
हितं कोणरक्तमंडले दक्षिणामुखमंगारकमावाहयामि किरीटिनं श्वेतवर्णं चतुर्भुजं दंडिनं वरदं काव्यं साक्षसूत्र-
कमंडलुं कीकटदेशजं भार्गवगोत्रजं शौनकार्षं पंक्तिः छंदसं श्वेतांबरधरं श्वेताभरणभूषितं श्वेतगंधानुलेपनं श्वे-
तछत्रध्वजपताकिनं मुकुटमणिकेयूरशोभितम् आरूढरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टम् अधिदेवते-
न्द्राणीसहितं प्रत्यधिदेवतासहितं षडंगं पंचकोणमंडले प्राङ्मुखं भगवंतं शुक्रमावाहयामि किरीटिनं श्वेतांबरधरं
दशाश्वं श्वेतभूषणं पाशपाणिं द्विबाहुं वनायुदेशजम् अत्रिगोत्रम् आत्रेयार्षम् अनुष्टुप् छंदसं श्वेतांबरधरं श्वेताभरणभू-
षितं श्वेतगंधानुलेपनं श्वेतछत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितम् आरूढरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्र-
हमंडले प्रविष्टम् अधिदेवतासहितं प्रत्यधिदेवतासहितं चतुरस्रमंडले प्रत्यङ्मुखं सोममावाहयामि किरीटिनं पीतमा-

10

१०

त्पांवरधरं पीतवर्णं कर्णिकारसमद्युतिं खड्गचर्मगदापाणिं सिंहस्थं वरदं मगधदेशजांत्रिगोत्रजं भारद्वाजार्षजं बृह
तीछंदसं पीतांवरधरं पीताभरणभूषितं पीतगंधानुलेपनं पीतछत्रध्वजपताकिनं मुकुटकेयूरमणिशोभितमारूढस
रथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवताविष्णुसहितं प्रत्यधिदेवताविष्णुसहितं पीतवाणमंडले द
क्षिणमुखं बुधमावाहयामि किरीटिनं पीतवर्णं चतुर्भुजं दंडिवरदं साक्षसूत्रकमंडलुं सिंधुदेशजमांगिरसगोत्रं
वासिष्ठाकार्षमनुष्टुप्छंदसं पीतांबरधरं ता पीतं गंधानुलेपनं पीताभरणभूषितं पीतछत्रध्वजपताकिनं मुकुट
केयूरमणिशोभितं आरूढस्वरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रविष्टमधिदेवेन्द्रसहितं प्रत्यधिदेवताब्रह्म
णा सहितं पीतदीर्घचतुरस्रमंडले उदङ्मुखं गुरुमावाहयामि किरीटिनमिंद्रनीलसमद्युतिं शूलधरं वरदं गृध्र
वाहनं सवाणवाणासनधरं सौराष्ट्रदेशजं काश्यपगोत्रजं भृग्वार्षं गायत्रीछंदसं कृष्णांवरधरं कृष्णाभरणभूषितं कृष्ण
गंधानुलेपनं कृष्णध्वजपताकिनं मुकुटकेयूरमणिभूषितमारूढस्वरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडले प्रवि
ष्टमधिदेवताप्रजापतिसहितं कृष्णधनुर्मंडले प्रत्यङ्मुखं विशानैश्चरमावाहयामि किरीटिनं करालवदनं खड्गचर्मत्रि
शूलधरं सिंहासनस्थं पूर्वदेशजं पाटलिगोत्रं मांगिरसार्षमनुष्टुप्छंदसं कृष्णांवरधरं कृष्णाभरणभूषितं कृष्णगं
धानुलेपनं कृष्णछत्रध्वजपताकिनं मुकुटकेयूरमणिभूषितमारूढस्वरथं दिव्यं मेरुं प्रदक्षिणीकुर्वाणं ग्रहमंडलप्र
प्रविष्टमधिदेवताकालसहितं प्रत्यधिदेवताकालसहितं कृष्णसर्पमंडले दक्षिणमुखं राहुमावाहयामि धूम्रान्
द्विबाहून् धरान् पाशधरान् विकृताननान् गृध्रवाहनान् किरीटिनो मध्यदेशजान् जैमिनिगोत्रजान् गौत

ग्रां·म·
११

माषान् नानाछंदसष्ट्रिंशांवरधरान् चित्राभरणभूषितान् चित्रगंधानुलेपनान् कृत्तपिंगध्वजपताकिनोमु
कुटकेयूरमणिशोभितान् आरुह्यरथंदिव्यंमेरुंप्रदक्षिणीकुर्वाणः ग्रहमंडलेप्रविष्टान् अधिदेवताब्रह्मस
सहितान् प्रत्यधिदेवताचित्रगुप्तसहितान् कृत्तपिंगध्वजमंडलेदक्षिणाभिमुखान् केतून् आवाहयामि स्कांदे ई
श्वरेभास्करंविद्यादुमांविद्यान्निशाकरे स्कंदमंगारकेविद्याद्बुधेनारायणंविदुः १ गुरुंवेदनिविंद्याच्छुक्रेशक्रोवि।
धीयते शनैश्चरेयमंविद्याद्राहुंकालंतथैवचः चित्रगुप्तोधिपःकेतोरित्येताग्रहदेवताः २ वेदविधिर्ब्रह्मा तत्रै
व वक्ष्येस्थानानिदेवानामीश्वरादियथाक्रमं सूर्यस्येवोत्तरेशंभुमुमांसोमस्यदक्षिणे १ स्कंदमंगारकस्यैवदक्षि।
णस्यांनिवेशयेत् सोमात् पश्चिमतोविष्णुर्ब्रह्माजीवस्यपूर्वतः २ इंद्रमैत्रासिताद्दिक्षिमंदाद्राग्नेयतोयमं राहोःपू
र्वोत्तरेकालंसर्वभूतभयावहं ३ केतोर्नैरृत्यदिक् भागेचित्रगुप्तंनिधापयेत् स्कांदे अतःस्थापनमंत्राश्चकथ्य।
याम्यनुपूर्वशः ईश्वरंत्र्यंबकंचेतिश्रीसूनेचेतिपार्वती १ यदक्रंदेतिचस्कंदेविष्णुंविष्णोरराडिति आब्रह्मन्निति
ब्रह्माणंसजोषेंद्रेतिवासवं २ यमायत्वेतिचयमंकालंकार्षिरसीतिच चित्रावसवितिमंत्रेणचित्रगुप्तंनिधापये
त् ३ अग्निरापःक्षितिर्विष्णुरिंद्रश्चैंद्रीप्रजापतिं सर्पाब्रह्माचनिर्दिष्टाप्यधिदेवायथाक्रमं ४ अग्निंदूतमितित्वग्ने
वरुणस्यउत्तनमं स्योनापृथिवीमेदिन्याइदंविष्णुस्तुविष्णवे ५ इंद्रायेंद्रश्रुतीद्रसोतानपर्णोशचीस्थितौ प्रजाप
तेप्रजपश्चास्यपयब्रह्मेतिवैविधेः ६ मंत्रेणनमोस्तुसर्पेभ्यः सर्पाणांस्थापनेमतः ग्रहदेवाधिदेवानांनैवेद्यकुसुमा
निच ग्रहवद्वासनंदानंस्थापनंचानुपूर्वशः ८ अथसूर्यादयोग्रहाईश्वरादयोदेवाः अग्न्यादयोधिदेवाः तत्रैश्व ११

णदिदेवानांसूर्यस्यवोनरेशंभमित्यादिनापूर्वस्यलान्युक्तानि आग्न्याधिदेवास्तुग्रहदेवयोर्मध्येस्थाप्याः तथाच
मदनरत्नेगोभिलवसिष्ठौ ग्रहदेवतायोर्मध्येअधिदेवान्निधापयेत् तत्रैवमत्स्यपुराणे ईश्वरादयोदेवा अधिदेवता
त्वेन व्यवहृता अग्न्यादयस्तुप्रत्यधिदेवतात्वेन तेषांस्थापनांतरंचोक्तं अधिदेवतादक्षिणतोवामेप्रत्यधिदेवता
स्थापनीयाः प्रयत्नेनव्याहृतीभिः पृथक् तत्रैवावासिष्ठीयेत देवानांस्थापनानंतरंक्वचित् मंत्रांतरंचोक्तं रुद्रंत्र्यंब·
कमंत्रेणरवेरुत्तरतोन्यसेत् सोमस्याग्नेयदिग्भागेश्वीश्वतमेनकाम्यजा १ यदक्रंदेतिभौमस्यप्राच्यांशक्रंनिधापयेत्·
विष्णुर्विष्णोरराटेनयजेत् पूर्वेबुधस्यत २ गुरोरुत्तरतोभ्यर्चेद्ब्रह्माब्रह्मेतिमंत्रतः सजोषेंद्रेतिशुक्रस्यप्राच्यांशक्रोनि
धापयेत् ३ शनिःपश्चिमतोस्थाप्योयमायत्वेतचायमः कार्षिरसीतिमंत्रेणराहोःकालंतथोत्तरे ४ चित्रगुप्तंतुके·
तूनांचित्रावसिवितिनैऋते ग्रहास्त्वदेवताख्याताः प्रत्यधिदेवताः ५ अग्निरापोधराविष्णुरिंद्राणीचप्रजापतिः
सर्पाब्रह्मचनिर्दिष्टअधिदेवायथाक्रमं ६ ग्रहदेवतयोर्मध्येअधिदेवानिवेशयेत् एतानिचवासिष्ठीयवचांसिके·
७४ श्चित्त्वाद्रियतत्ते पारिजाते पद्मप्राग्दलमारभ्यदलाग्रेक्रमान्न्यसेत् इंद्रादिलोकपालाश्चतत्तन्मंत्रैःप्रपूजयेत् १
विनायकंतथादुर्गांवायुमाकाशमेवच आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ २ एतेचविनायकाद्याःपंचग्र
हेभ्यः उत्तरतोस्थाप्याइतिसंप्रदायिका दक्षिणपश्चिमवायव्योत्तरपूर्वेषुयथाक्रममित्यन्ये राहुमंददिनेशानामु
त्तरस्थांयथाक्रमं गणेशोदुर्गावायुश्चराहुकेत्वोश्चपश्चिमे आकाशमश्विनौचेतिपंचैतानस्थापयेद्बुधः १ इतिसंग्र
हानुसारेणेतिपितामहचरणाः रूपनारायणाश्चस्कंदे उत्तरेशानिसूर्याभ्यांगुरुकेत्वोश्चदक्षिणे गणाधिपंप्रतिष्ठा

प्यसर्वदेवनमस्कृतं १ रविशनिकेतुग्रहाणांमध्येश्रतिफलिनोर्थः विनायकपदमुपलक्षणांतेनदुर्गादयोप्यत्रैवस्था
ग्रो·म· प्यइतिकेचित् चंदनादिनियमस्तत्रैव दिवाकरकुजाभ्यांहिदापयेद्रक्तचंदनं चंद्रेचभार्गवेचैवसितवर्णंप्रदापयेत्
कुंकुमेनतुसंयुक्तंचंदनंजीवसौम्ययोः अगरुचंदनंदद्याद्राहुकेत्वर्कजेषुच २ ग्रहवर्णानिपुष्पाणिगायत्र्याधूपमाद
१२ हेत् रवेःकुंडरुकंधूपंशशिनस्तघृताक्षताः ३ भौमेसर्जरसंचैवअगरुंचविधोःस्मृतं सिंहकंगुरवेदद्यात् शुक्रेविल्वागु
रुंतथा ४ गुग्गुलंमंदचारेतुलाक्षाराहोस्तुकेतवे कुंडुरुकःसल्लकीनिर्यासःसिंहकं सिल्हाइतिमध्यदेशेप्रसिद्धं विल्वा
गरुंविल्वफलनिर्यासससहितमगुरु मंदवारःशनिः उदीप्यस्वेतिमंत्रेणदीपंदद्यादतद्विजः विहितगंधधूपा
दिनामसंभवेतु याज्ञवल्क्यः यथावर्णंप्रदेयानिवासांसिकुसुमानिच गंधाश्चवलयश्चैवधूपोदेयस्तुगुग्गुलः स्कां
दे गुडोदनंरवेर्दद्यात् सोमायघृतपायसं लोहितायहविष्यान्नंबुधायक्षीरषाष्टिकं १ दध्योदनंगुरोर्दद्यात् शु
क्रायचघृतोदनं मिश्रितंतिलमाषैश्चनैवेद्यंतुशनैश्चरे २ राहोर्मांसोदनंदद्यात् केतोश्चित्रोदनंतथा चित्रोदनं·
तिलतंडुलमिश्रंस्यात् क्षीरंचशोणितं कर्णनासागृहीतंस्यादेतच्चित्रोदनंतथा ४ स्मृतमितिदामोदरः पंचैरेव
द्रव्यैर्ब्राह्मणान्विभोज्य तथाचयाज्ञवल्क्यः गुडोदनंपायसंचहविष्यंक्षीरषाष्टिकं दध्योदनंहविश्चूर्णंमांसंचित्रान्न
मेवच १ दद्याद्ग्रहक्रमादेतद्द्विजेभ्योभोजनंबुधः शक्तितोवायथालाभंसत्कृत्यविधिपूर्वकं २ वसिष्ठः उपचारा·
णिसर्वेषांअपिश्रुक्ताक्षतैः सदागंधाभावेप्रसूक्ष्मगंधंपुष्पाभावेस्तुगंधकं ३ धूपाभावेगुग्गुलःस्यात् द्रव्याभावेतुमि
श्रकं पंचामृतंगवामेवमिश्रकंनकदाचनेति ४ मात्स्ये प्रागुत्तरेणतस्माच्चदध्यक्षतविभूतये चूतपल्लवसंयु १२

क्तंफलंवस्त्रयुग्मान्वितं १ पंचरत्नसमायुक्तंपंचभंगंयुतंतथा स्थापयेद्व्रणंकुंभंवरुणंतत्रविन्यसेत् २ गंगाद्याः
स्सन्तःसर्वाःसमुद्राश्चसरांसिच गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ३ मृदमानीयविप्रेंद्रसर्वौषधिसम
न्वितं स्नानार्थंविन्यसेत्तत्रयजमानस्यधर्मवित् ४ याज्ञवल्क्य अर्कःपलाशःखदिर अपामार्गोथपिप्पलः उदुं
बरःशमीदूर्वाकुशाश्चसमिधःक्रमात् १ ईश्वरादिदेवानांस्वस्वसमिद्भिरेवहोमः २ हेमाद्रौदेवीपुराणे गणाधि
पतयेदेवाप्रथमान्नवराहुतिः अन्यथाविफलंविप्रभवतीहनसंशयइति आश्वलायनः जुहुयात्समिदाज्येनाभि
ऋग्भिरित्तिकममिति समित्स्वविशेषमाह याज्ञवल्क्यः होतव्यामधुसर्पिर्भ्यांदध्नापयवदितिवाच्यं आदौतुसमि
दन्वाज्यैः पृथगष्टोत्तरशतमिति वासिष्ठात् अन्यत्रापिसंप्रतिपन्नदेवताकेस्मार्तेकर्मणिनेकद्रव्यकेपृथगेवहोमइ
ति सांप्रदायिकाःबहुष्वेककर्मस्वप्रायोवचनान्यथैवांस्कांदे आकृष्णेनसहस्रांशोगिरिमंदेवान्थेंदवे १ अग्निर्मूर्धेति
भौमायउद्बुध्यस्वबुधायच बृहस्पतेतिचगुरोःशुक्रायान्नात्परिस्रुतः २ शनैश्चरस्यमंत्रोयंशन्नोदेवीरुदाहृतः कया
नश्चित्रइतिराहोकेतुंकृण्वन्नकेतवे ३ मात्स्ये आवोराजेतिरुद्रस्यवलिहोमंसमाचरेत् आपोहिष्ठेत्युमायास्तुस्योनेः
तिस्वामिनस्तथा १ विष्णोरिदंविष्णुरितित्यमित्सेति स्वयंभुवः इंद्रमिदेवतातयइति इंद्रस्यप्रकीर्तितः २ तथायमस्य
चायंगौरितिहोमःप्रकीर्तितः कालस्यब्रह्मजज्ञानमितिमंत्रःप्रकीर्तितः ३ चित्रगुप्तस्यचाज्ञातमितिपौराणिकावि
दुः अग्निंदूतंवृणीमहइतिवन्हेरुदाहृतः ४ उदुत्तंवरुणेतिअपांमंत्रःप्रकीर्तितः भूमेःपृथिव्यांतरिक्षमितिवेदे
षुपठ्यते सहस्रशीर्षापुरुषइति विष्णोरुदाहृतः इंद्रायेंदोमरुत्वतइतिशक्रस्यशस्यते ६ उत्तानपर्णेसुभगे

इतिसच्यासमाचरेत् प्रजापतेः पुनर्होमं प्रजापतय इतिस्मृतः ७ नमोस्तुसर्पेभ्य इतिसर्पाणांमंत्र उच्यते एषब्रह्मा
यज्ञत्विज इतिब्रह्मण उदाहृतः ८ विनायकस्यचात्मन इतिमंत्रोबुधैःस्मृतः जातवेदसेसुनवामदुर्गामंत्रोयमुच्यते ९
पूर्णाहुतिंचविमूर्धानंदिव इत्यभिपातयेत् १० स्कांदे नैवेद्यशेषहुत्वाचहोममंत्रादनंतरं अथव्याहृतिभिर्हुत्वाएकैकस्य
यथाक्रमं १ अष्टोत्तरंचसाहस्रंशतमष्टाधिकंतथा अष्टाविंशतिरष्टौवाएकैकस्यतुहोमयेत् २ होतव्यंचघृतंतत्रचरुं
लक्षादिकंपुनः मंत्रैर्दशाहुतिंहुत्वाहोमोव्याहृतिभिःस्मृतः ३ अथेतिअथवेत्यर्थः गृहीत्वानामथांबिकामितिवत् ।
मदनरत्नेथवेत्येवपाठः ततमंत्राणांव्याहृतीनांचपरस्परंविकल्पः अष्टोत्तरसहस्रादिसंख्यानुपपत्तिद्वयेपि नैवेद्यहोम
शेषस्तुशाखाविशेषपर इत्यपिसयवलक्षादिकः पुनर्व्याहृतिभिर्होमोमंत्रैर्दशाहुतीर्हुत्वास्तन इत्यन्वयः मंत्रैःग्रह
मंत्रैः व्याहृतिभिर्व्यस्ताभिः समस्ताभिश्चतातचरणास्तु अथव्याहृतिभिर्हुत्वेतिएषग्रवाक्यं एकैकस्यतुप्रतिदेव
तमष्टादिसंख्यान्वायार्थं एकैकस्यतुहोमयेदित्येकपदंतुचर्वादिद्रव्यपरं नतुदेवतापरं अस्मिन्नेवहोमेव्रतचरुविधि
रग्रेलक्षादिक इत्येतत्तु अथव्याहृतिभिर्हुत्वेतिविहितेहोमेलक्षादिसंख्याविधानार्थं मंत्रैदित्यादि चैतत्चरुहोमोत्तरंसो
मंराजानमितिमंत्रेणयथा प्रकृतिस्विष्टकृद्धुत्वासूर्यादिमंत्रैर्दशाहुतीप्रतिदेवतंलक्षहोमादिद्रव्येणहुत्वा व्याहृति
भिर्लक्षादिहोमःकार्यः इत्याहुः यवाचन्यतमद्रव्येणग्रहादिभ्यः प्रत्येकंदशाहुतीस्तत्तन्मंत्रैर्हुत्वातेनैवमंत्रेणव्यस्त
समस्तव्याहृतिभिरयुतलक्षकोट्यन्यतमसंख्ययाजुहुयादितिहेमाद्रिमतेनो तानिचद्रव्याणिदेवीपुराणे यवव्रीहि
घृतक्षीरतिलकंगुप्रसारिकाः पंकजोशीरबिल्वार्कदलाहोमेप्रकीर्तिताः १ उदङ्मुखःप्राङ्मुखोवाकुर्याद्ब्राह्मणपुं १३

गवाः मंत्रवंतस्य कर्तव्याचरवः प्रतिदैवतं २ हुत्वा चतांस्त्वहूतान् सम्यक् ततोहोमं समारभेत् चर्वादिकं मधु
ताभ्यक्तं च होतव्यं होतव्यं चहुताभ्यक्तं चरुर्भस्मादिकं पुनरितिमात्स्यात् भक्तं द्राक्षादि चरुर्नैवेद्यशिष्टो गुडौदनादिः
तानि द्रव्याण्युक्ता इत्येतानि हवींषि स्युः समित्संख्यासमाहुतीरित्याश्वलायनोक्तेः अधिदेवतादिभ्योपि होमो दे
मादे— चरुणा च समिद्भिश्च सर्पिषा च तिलैः क्रमात् तत्तन्मंत्रैश्च होतव्याः क्रमाद्ग्राधिदेवताः गृह्यपरिशिष्टेः
प्रधानदक्षभागेशानपार्श्वदेवयोरिति अधिदेवतादिहोमे संख्या वासिष्ठे द्विजाश्चैवादेवत्याः पंचानां चैव पंचधेति
द्विजाः पंच पंचादीनां गणेशादीनां पंचधा प्रत्येकमित्यर्थः केचित्तु होत्रयो वा द्विजाः विनायकादीनां पंचधा एकैक
मितिकेचित् प्रयोगपारिजाते इंद्रादिलोकपालांश्च तत्तन्मंत्रैः प्रपूजयेत् तत्तन्मंत्रैः जपं कुर्यात् ततो होमं समा
चरेत् नृसिंहपुराणे ततो व्याहृतिभिः पश्चाज्जुहुयाच्च तिलादिकं यावत् प्रष्ज्यते संख्या लक्षं वा कोटिरेव वा वाश
ह्वादयुतमपि ग्रहयज्ञस्य नतीयत कालीनः स्वेच्छया यत्तः स उच्यत इति भविष्योत्तरात् ततो व्याहृतिभिः कुर्यात्तिल
होमं प्रयत्नतः प्रथमोयुतहोमः स्याल्लक्षहोमो द्वितीयकः १ तृतीयः कोटिहोमः स्यात् त्रिविधो ग्रहयज्ञकः एकरात्रं त्रि
रात्रं वा पंचरात्रमथापि च २ शिवगाथ्यांविस्नुगाथ्यांशांतिब्राह्मणभोजने समापयेत्प्रतिदिनं एवं भक्तिसमन्वितः ३
इति वासिष्ठेभाष्ये एकरात्रादि ग्रहणं नियमानादरार्थं अयुतसहस्रकादिः जपोपि तुलादानवदिति केचित्तु वासि
ष्ठे अथाभिषेकमंत्रेणवाद्यमंगलगीतकैः पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः १ अव्यंगावयवैर्ब्राह्मन् हेम
स्त्रग्दामभूषितैः यजमानस्य कर्तव्यं चतुर्भिः स्नपनं द्विजैः २ अभिषेकमंत्राः प्रयोगे वक्ष्यंते वसिष्ठः स्वस्तिकंक

ग्रां·म·
१६

येत्पश्चात् कुंडस्येशानभागतः यजमानाभिषेकार्थंतत्रभद्रासनंन्यसेत् १ प्राङ्मुखस्योपविष्टस्ययजमानस्य
तत्रच अभिषेकंततःकुर्युःसाचार्याःषोडशर्त्विजः २ विविधैर्मंगलैर्घोषैःसूतमागधजैःसह ततस्तस्याभिषिक्तस्य
स्नानार्थंवलिमुत्क्षिपेत् ३ दिग्विदिक्षुविचित्रान्नैर्दीपैर्नीराजयेत्ततः सुक्लमाल्याम्बरधरःसुक्लगंधानुलेपनं ४ ततो·
मंडलमागत्यधापेदग्निंयत्नतः प्रत्येकंप्रतिमंत्रेसुदद्यात्पुष्पांजलिंततः ५ इतिचामनः आचार्यप्रभृतिभ्यश्चय
हार्चनफलंततः समिदाज्यचरूणांचतिलहोमफलंचयत् १ ब्राह्मणैर्घटकुंभस्थजाप्यांचार्चनस्यफलंचयत् गणेशाद्ये
त्रपालाश्चदुर्गादेव्यंगदेवता २ तासांजपफलंसम्यक् गृहीत्वापाज्जलपूर्वकं एतानिचवामनवाक्यानिनिर्मूलानीति
पितामहचरणाः वासिष्ठगोभिलवचसामपिकेचिदाहुः वसिष्ठः ततोजपादीन् जुहुयात् पूर्णाहुतिमथाचरे
त् तत्रैव सप्तते अग्न इति मंत्रेणपूर्णाहुतिंचरेत् अग्निपुराणे मूर्द्धानंदेवमंत्रेणसंस्रवेणचधारया दद्यादक्षा
यपूर्णंवैनोपविश्यकदाचनेतिमात्स्ये पूर्णाहुतिंचमूर्द्धानंदिवइत्यभिपातयेत् अत्रभिन्नशाखागतैकादशा·
दशाकपालभेदेऽप्येकत्वादेकवदनेकमंत्रयुक्तायाअनेकस्त्रुक्प्रक्षेपायाअपिपूर्णाहुतेरेकत्वान्मंत्राणांविकल्पः उपांशुया
जश्चशाखाभेदभिन्नानांयाज्यानुवाक्यानांसमुच्चयेनतत्पदंतिवसोर्द्धारात्वपुनहोमेनास्ति प्रमाणाभावात् ततःसु
क्लांबरधरः सुक्लगंधानुलेपनः सर्वौषधैःसर्वगंधैःस्नापितोवेदपुंगवैः १ यजमानःसपत्नीकऋत्विजस्तान्समाहितः
दक्षिणाभिः प्रयत्नेनपूजयेद्गतविस्मयः २ सवत्सकपिलांधेनुंदद्यात्कांतानथैदवै रक्तंधुरंधरंदद्याज्जैमायककु·
दाधिकेकुंडाधि ३ धुयायजानरूपंतुगुरुवेपीतवाससी स्वेतांश्चेदेत्यगुरगेकस्मांगामर्कसूनवे ४ आयसंराहवे १६

दद्यात्केनवेक्षगमुत्तमं सुवर्णेनसमाकार्यायजमानेनदक्षिणा: ५ वुधमीत्यर्थं देयंहेस्नासहस्रसर्वांशुमूल्यतः स
माश्रिकेचित् अस्मिन् पक्षेषोडशमाषविशिष्टहेमवाचिसुवर्णपदासामंजस्यापत्तेस्तादृशसुवर्णमूल्याप्रत्ये
कमितिपरे वहल्पमूल्येषुतथाहेमापिदेयंयथासर्वा: प्रत्येकंदशमाषसुवर्णेनसमाभवतीतिसम्यक् सर्वेषाम
थवागावोगुरुर्वायेनतुष्यतिः स्वमंत्रेणप्रदानश्चासर्वेःसर्वेत्रदक्षिणाः १ स्कांदे केतवेक्षागमासानि सर्वेषा
मेवकांचनमिति तत्रैव यस्यपीडाकरोनित्यंस्वल्पविप्रस्यवाग्रहः तमेवपूजयेद्भक्त्यादक्षिणाभिस्वशक्तितः दा
नोद्योते आश्वलायनः यथाशक्तितत्तोविप्रान्ऋत्विजश्चेतरानपि एकमेवाहुतोविप्रंहोमेत्वन्नेनभोजयेत् १ अ
र्थोमध्यमश्चापिविप्रमेकंशताहुतो सहस्रस्यहुतेचैकंपश्चान्योपिप्रभोजयेत् २ तत्रैव तस्मादात्मशक्त्योपिदक्षिण
वन्नमेववा जपैःप्रमाणैःस्तोत्रैश्चतोषयेत्तर्पयेद्गुरुं १ स्कांदे यथाग्रहोद्विजस्तद्वद्विधिस्तोवेदपारगः तोषयन्स्व
ढुवस्त्राद्यैःतुष्टमेनंविसर्जयेत् १ अन्नहीनोदहेद्राष्ट्रंमंत्रहीनस्तुऋत्विजः यजमानमदक्षिणोनास्तियज्ञसमोरिपुः
तत्रैवः यथासमन्वितंयंत्रंयंत्रेणप्रतिहन्यते एवंसमुत्थितंचोरंशीघ्रंयत्नांपाविनश्यति ३ अहिंसकस्यदान्तस्य ध
र्मार्जितधनस्यच नित्यंचनियमस्थास्यसदासानुग्रहाग्रहाः ४ ग्रहागावोनरेंद्राश्चब्राह्मणाश्चविशेषतः पूजिताः
पूजयंत्येतेनिर्दहंत्यवमानिताः ५ ग्रहाणामिदमातिथ्यंकुर्यात्संवत्सरादपि आरोग्यबलसंपन्नोजीवेच्चशरदांशतं ६ मा
तो एवंसमस्तान्निष्पाद्यसर्वान्देवान् विसर्जयेत् तत्रमंत्रः यान्तुदेवगणाः सर्वेपूजामादायपार्थिवी इष्टकामप्रदाना
यंपुनरागमनायच भविष्योत्तरे ततःसमाप्तेयज्ञेतुकारयेत्तुमहोत्सवं शंखतूर्यनिनादेनब्रह्मघोषरवेणच १ मात्स्ये

ग्रा॰म॰ अनेनविधिनायुक्तग्रहयज्ञंसमारभेत् सर्वान्कामानवाप्नोतिप्रेत्यस्वर्गेमहीयते १ सदेवापुनर्होमोयंनवग्रह·
मखेःस्मृतः विवाहोत्सवयज्ञेषुप्रतिष्ठादिषुकर्मसु २ निर्विघ्नार्थंमुनिश्रेष्ठतथोद्वेगाद्भुतेषुच वश्यकर्माभिचारा·
१५ दितथैवोच्चाटनादिकं ३ नवग्रहमखंकृत्वाततःकाम्यंसमारभेत् अन्यथाफलदंपुंसांनकाम्यंजायतेक्वचित् ४·
धा तस्मात्पुनर्होमस्याविनंतुसमारभेत् विवाहेत्यादिनाचविवाहादिषुचकाम्येषुचकर्मस्वंगत्वमुक्तं अत्रग्रहस्वरूप
वर्णदेशगोत्राग्निस्थापनमुखाकारहोममंत्रचंदनधूपनैवेद्यसमिद्दक्षिणाधिदेवताप्रत्यधिदेशकवाक्येषुग्रहाणां
स्वरूपनिर्देशस्थापनहोममंत्रोपदेशवाक्येषुचाधिदेवताप्रत्यधिदेवताविनायकादिपंचलोकपालानामनेकस्मृ
तिपुराणभेदेनभूयोविसंवादिभिरनेकैः पर्यायशब्दैरूपस्थितेर्नात्रैकवेधशब्दनियमः नापिमंत्रवर्णैनैकशब्दो
पस्थितिः प्राहुः विशेषैर्देवता अनुयंतस्मारकतयामंत्रविनियोगेनमंत्राणांदेवताज्ञापकत्वायोगात् तेषांवा·
हुल्येनस्पष्टलिंगाच्च अतोद्रव्यत्यागादिषुस्वरूपादिनिर्देशकस्मृतिमंत्रवर्णोपस्थितिशब्दानामन्यतमेनशब्दे
नोद्देशोग्रहादीनामिति शिष्टाचारोप्येवं अत्रव्याहृतिकरणकेपुनर्होमेग्निवायुसूर्यप्रजापतयएवदेवताःन
ग्रहाः पैंग्यादिगवत् तत्प्रकाशकत्वेनविनियोगाभावात् अतएवपारिजाते ओंभूर्भुवःस्वश्चेतितिस्रोव्याहृतयो
जपेत् आभिस्तुहोमेतिसृभिस्तुनर्थीस्यात् समासतुइति समस्ताभिरेवहोमः सचाग्निवायुसूर्यदेवत्यइतितन्मद
नः सर्वेषांव्याहृतिहोमेनग्रहाधिदेवताइति प्रधानंचात्रग्रहयज्ञाङ्गहोमोपुनर्होमादिश्च श्रीकामःशांतिकामो
वाग्रहयज्ञंसमाचरेत् इत्यादिनातत्तज्जातहोमयोःफलसंबंधात् ग्रहयज्ञस्त्रियेष्वलकाप्रथमोपुनर्होमइत्यादि

नाद्युतलक्षकोटिहोमानां ग्रहयज्ञविशेषत्वेनोपक्रमात् तस्मादयुतहोमस्य विधानं तु समाचरेदित्युपसंहाराच्च
ग्रहाग्रहदेवत्येकर्मसमूहे प्राणभृत उपदधातीतिवल्लिंगसमवायेन ग्रहयज्ञशब्दः तातचरणास्त्वयुतहोमा
दीनामेव प्राधान्यं ग्रहहोमस्त्वंगमित्याहुः तदाशयं न जाने यो हि कामशब्देन फलसंबंधः श्रीकामः शांतिकामो
वा ग्रहयज्ञः समाचरेदित्यादिना स तावद्ग्रहप्रजाहोमयोरेवोचितः ग्रहसंबंधाभावे ग्रहः यज्ञस्य शब्दस्य तन्नामत्वात् अ
युतहोमादिशब्दानां ग्रहयज्ञसमानाधिकरण्येन ग्रहयज्ञनामत्वं तु लिंगसमवायेन तदंगत्वेन अर्थवादिकः फ
लसंबंधस्तु अनेन विधिना यस्तु ग्रहप्रजां समाचरेत्सर्वान् कामानवाप्नोति प्रेत्य स्वर्गे महीयते इत्यत्र यजगदेव
प्रजासमशांतिकरणादाने श्रुति अवष्टियोः प्रजाहोमयोः सदैवायुतहोमो यस्मिन्नित्याद्युपक्रम्य निर्विघ्नार्थमुनिश्र
ष्ट इत्यादिना त्वयुतहोमादिनामपि स्मृतिशब्दप्राप्तः आर्थवादिकफलं अत्र कामशब्दोपनीते फले सत्यार्थवादिकं ।
संबंधान्ते न वेति तु विचारांतरं किंच याज्ञवल्क्यादिस्मृतिषु न तावदयुतहोमादीनां विधिर्नाप्यनुवादः अतो ग्रहप्र
जाहोमयोः प्रधान्यभावेन तत्र त्यैतिकर्तव्यसंबंधो न स्यात् अतो ग्रहप्रजाहोमयोरपि प्राधान्यं भाति अत एव क्वचित् के
वलग्रहमखे युतदंगके षुचशांतिकादिकर्मस्वेकस्य स्वतंत्राणां गप्रधानादरेण स्वतंत्रोक्त प्रधानभूताद्युतादिहोमं वि
नापि शास्त्रांतरोक्त ग्रहयागांतराभ्यासांतरं विनैकशाखीय ग्रहयागाभ्यासमात्रेणानिब प्रजाग्रहदैवत्यहोमयोरेवा
नुष्ठानं कथंचित् शिष्टानां संगच्छते ग्रहप्रजाहोमयोरंगत्वेत्वंगमात्रानुष्ठानमेव स्यात् अथ ग्रहादीनां लक्षणानि
मात्स्ये पद्मासनः पद्मगर्भः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थश्च द्विभुजः स्यात्सदा रविः १ श्वेतः श्वेतांवरधरो

प्रा॰म॰ दशास्य: श्वेतभूषणः गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी २ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः चतु·
र्भुजो मेषगमो वरदः स्याद्धरासुतः ३ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः खड्गचर्मगदापाणिः सिंहस्थो व·
१६ रदो बुधः ४ देवदैत्यगुरू तद्वत् पीतश्वेतौ चतुर्भुजौ दण्डिनौ वरदौ कार्यौ साक्षसूत्रकमण्डलू ५ इन्द्रनीलद्युतिः शूली
वरदो गृध्रवाहनः बाणबाणासनधरः कर्त्तव्योऽर्कसुतः सदा ६ करालवदनः खड्गचर्मशूलवरप्रदः नीलसिंहा
16 सनस्थश्च राहुरत्र प्रशस्यते ७ धूम्रा द्विबाहवः सर्वे गदिनो विकृताननाः गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः ८
सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः अङ्गुलेनोच्छ्रिताः कार्याः शतमष्टोत्तरं सदेति ९ अथाधिदेवताप्रत्यधि
दैवतालक्षणानि विष्णुधर्मोत्तरे पंचवक्त्रो वृषारूढः प्रतिवक्त्रं त्रिलोचनं कपालशूलखट्वाङ्गी चंद्रमौलिः सदाशि·
वः अक्षसूत्रं च कमलं दर्पणं च कमंडलुं उमा बिभर्त्ति हस्तेषु पूजिता त्रिदशैरपि २ कुमारः षण्मुखः कार्यः शिखंड
कविभूषणः रक्ताम्बरधरो देवो मयूरवरवाहनः ३ कुक्कुटश्च तथा घंटा तस्य दक्षिणहस्तयोः पताका वैजयंती स्याच्छ । मा
क्तिः कार्या च वामयोः ४ विष्णुः कौमोदकीपद्मशंखचक्रधरः क्रमात् प्रदक्षिणं दक्षिणाधः करादारभ्य नित्यशः ५
पद्मासनस्थो जटिलो ब्रह्मा कार्यश्चतुर्भुजः अक्षमालां स्रुवं बिभ्रत् पुस्तकं च कमंडलुं ६ चतुर्दन्तो गजारूढो व
ज्रांकुशलसत्करः शचीपतिः प्रकर्त्तव्यो नानाभरणभूषितः ७ ईषन्नीलो यमः कार्यो दंडहस्तो विजाननः रक्तदृक्
पाशहस्तश्च महामहिषवाहनः ८ कालः करालवदनो नीलाङ्गश्च विभीषणः पाशहस्तो दंडहस्तः कार्यो हस्तिकरो १६
मवान् ९ अपीच्यविशवाकारं द्विभुजं सौम्यदर्शनं दक्षिणे लेखनी चित्रगुप्तं वामेन पात्रकं १० पिंगलश्मश्रुके ।

शान्तःपीतांगजठरोरुणः छागस्थःसानलस्त्वोग्निः सप्तार्चिशक्तिधारकः ११ विहितंचामरेणास्यकरमन्यंप्रकल्प
येत् आपश्चीरूपवारिणपः श्वेतोमकरवाहनः १२ दधानःपाशकुलिशौमुक्ताभरणभूषितः शुक्लवर्णामहीका
र्यादिव्याभरणभूषिता १३ चतुर्भुजोसौम्यवपुः खड्गाग्रुसटधरावरः रत्नपात्रेसस्यपात्रंपात्रेमौषधिसंयुतं १४
पर्यंकरेचकर्त्तव्यंध्रुवोपादवनेंदनः दिग्भागानांचतुर्णांसाकार्यापृथगताततथा १५ विलोरिंद्रस्यचोत्कंवामेशाच्याः
करेकार्यासौम्यासंतानमंजरी वरदामंडिताकार्याद्विभुजाचतथाशची १६ यज्ञोपवीतिहंसस्थोएकवक्त्रश्चतुर्भु
जः अक्षस्रुवंस्रुवंविभ्रत्कुंडिकाचप्रजापतिः अक्षंअक्षमालांकुंडिकाकमंडलु अक्षसूत्रधराःसर्वाकुंडिकापुस्त
भूषणाः एकभोगास्त्रिभोगावासर्वेकार्याविभीषणाः १८ अथलक्षणमक्षं ग्रहाणांदक्षिणेपार्श्वेस्थापयेद
धिदेवताः ग्रहाणामुत्तरेपार्श्वेन्यसेत्प्रत्यधिदेवताः अथविनायकादिलक्षणानि चतुर्भुजस्त्रिनेत्रश्चकर्त्तव्योत्रग
जाननः नागयज्ञोपवीतश्चशशांककृतशेखरः १ हस्तेदंतंकरेदद्याद्वितीयेचाक्षसूत्रकं तृतीयेपरशुंदद्याच्चतुर्थे
मोदकंतथा २ शक्तिंबाणंतथाशूलंखड्गंचक्रंचदक्षिणे चंद्रबिंबमथोवामेखेटमूर्ध्वेकपालकं ३ धनुःकंटकंच
बिभ्राणादेवीसिंहारूढाचतुर्भुजा एषादेवीसमुद्दिष्टादुर्गादुर्गार्त्तिहारिणी ४ धावद्धरिणपृष्ठस्थोध्वजधारीस
मीरणः वरदानकरोधूम्रवर्णःकार्योविजानता ५ नीलोत्पलाभंगगनंतद्वर्णांबरधारिच चंद्रार्कहस्तंकर्त्तव्यं
द्विभुजंसौम्यरूपवत् ६ द्विभुजौदेवभिषजौकर्त्तव्यौरूपसंस्थितौ तयोरौषधयःकार्यादिव्यादक्षिणहस्तयो ७
वामयोःपुस्तकौकार्यौदर्शनीयौतथाद्विजाः एकस्यदक्षिणेपार्श्वेवामेचान्यस्यपादपः ८ नारीयुगंप्रकर्त्तव्यंस

शां॰म॰
८

रूपंचारुदर्शनं रक्तभांडेरक्तकार्येचंद्रशुक्लावरेतथा ९ अथलोकपालरूपाणि तत्रेंद्राग्नियमरूपाण्यधिदेवताप्रत्या
धिदेवताचोक्तानि एवंचर्मधरोनित्यंवालोनिर्ऋतिवाहनं ऊर्ध्वकेशीविरूपाक्षःकरालकालिकाप्रियः १ नागपाशधरोर
क्तभूषणःपद्मिनीप्रियः वरुणोंबुपतिःस्वर्णवर्णोमकरवाहनः २ वायुविनायकादिकंपंचकेउक्तं सोमोग्रहेषुअनं
तः सर्पःस्वप्रतिदेवतासहश्रयुतहोमः अथलक्षहोमः तत्रग्रहपीठादीनिनिमित्तान्युक्तान्ययुतहोमारंभे देवीपुरा
णे लक्षहोमंप्रवक्ष्यामियथाप्रोक्तंतुशंभुना भूमिकंपोदिशांदाहेग्रहयुद्धउपस्थिते केतुसंस्पर्शनेचैवआदित्यस्यचकं
पने १ कृष्णवर्णोयवासूर्येतथाछिद्रसमन्विते रक्तवृष्टिस्तथानद्योविपरीतावहंतिच २ निर्गतेगगनाद्धूमेवारिमध्येच
संस्थितं उपसर्गास्तथालोकेरौद्रास्तुभयकारकाः ३ यस्यराशौग्रहाःपंचअष्टसप्तसराधिप ग्रहाणांचंद्रसूर्यस्यग्रहेवा
ष्टमसंस्थितेरिष्टादि तथा २ कंपनंस्वेदनंगात्रेअंबुपानार्थजल्पनं वदनानांसुराध्यक्षउत्पाताभयकारकाः लक्षहो
मंप्रकुर्वीतकोटिहोममथापिवेति ३ मात्स्ये अस्मादष्टगुणाःप्रोक्तालक्षहोमः स्वयंभुवा आहुतीभिःप्रयत्ने
नदक्षिणाभिस्तथैवच १ द्विहस्तविस्तृतंतत्रचतुर्हस्तायतंपुनः लक्षहोमेभवेत्कुंडंयोनिवक्त्रंत्रिमेख
लं २ व्यासतोद्विहस्तविस्तृतफलतश्चतुर्हस्तायतंभवतीत्यर्थः तथातस्यचोत्तरपूर्वेणवितस्तित्रयसंमितं प्रागुदक्
प्रवणंतद्वच्चतुरस्रंसमंततः १ विष्कंभार्द्धोच्छ्रितंप्रोक्तंस्थंडिलंविश्वकर्मणा संस्थापनायदेवानांवप्रत्रयसमावृतं २
तस्मिंस्त्वावाहयेद्देवान् पूर्ववत् पुष्पतंडुलैः गरुत्मानपिकर्तव्यःसंपूज्यःप्रियमिच्छता ३ सामध्वनिशरीरस्त्वंवाहनं ८
परमेष्ठिनः विषमापहरोनित्यमतःशांतिंप्रयच्छमे ४ अथगरुडावाहनमंत्रः पूर्ववत्कुंभमामंत्र्यतद्वद्धोमंसमा॰

चरेत् सहस्राणां प्रान्ते हुत्वा समित्संख्यादिकं पुनः पूर्ववदेव समिदाज्यं चरुं होमं पूर्वोक्तैरेव मंत्रैः कुर्यात् गन्धमक्ष
सुपर्णोसि गरुत्मानिति वा मंत्रैः इदं मित्रमिति वा मंत्रः घृतकुंभवसोर्द्धारां पातयेदनलोपरि उदुंबरीमथार्द्रां च।
ऋत्विकोटरवर्जितां १ बाहुमात्रां स्रुचं कृत्वा तन्तं लभद्द्वयोपरि घृतधारां तथा सम्यगग्नेरुपरि पातयेत् २ श्रावयेत्सू
क्तमाग्नेयं वैश्ववं वैनेद्रमेदवं महावैश्वानरं सम्यक् ज्येष्ठसामं च पाठयेत् स्नानं च यजमानस्य पूर्ववत्स्वस्तिवाचकं दा
तव्या यजमानेन पूर्ववद्दक्षिणा पृथक् ४ कामक्रोधविहीनेन ऋत्विग्भ्यः शान्तमानसे एवं द्वादशा चाष्टौ वा लक्षहो
मेपि ऋत्विजः ५ कर्त्तव्यास्तु तुरालक्षस्त्वतुरौ वा विमत्सराः ब्राह्मणाचार्यसहितानामेवं संख्यानि केचित् नवग्र·
हमखास्तवं लक्षहोमे दशोत्तरं दद्याच्च मुनिशार्दूल भूषणान्यपि शक्तितः ७ शयनानि सवच्छवस्त्राणि हेमानि कट
कानि च कर्णांगुलिपवित्राणि कंचुस्त्राणि शक्तितः ८ न कुर्याद्दक्षिणाहीनं वित्तशाठ्येन मानवाः अदत्वा मोहलो
भाद्वा कुलक्षयमवाप्नुयात् ९ अन्नदानं यथाशक्त्या दातव्यं भूतिमिच्छता अन्नहीनः कृतो यस्मात् दुर्भिक्षफलदो भवे
त् १० तथा तस्मात्करोतीव यथ एव भवतः ग्रहः तमेव पूजयेद्भक्त्या द्वौ वा त्रीन् वा यथाविधि ११ तथा पूज्यते शिवलोके
च वस्वादित्यमरुद्गणैः यावत्कल्पशतान्यष्टौ अथ मोक्षमवाप्नुयात् १२ तथा पुत्रार्थी लभते पुत्रं धनार्थी लभते धनं भा
र्यार्थी लभते भार्यां कुमारी च शुभं पतिं १३ भ्रष्टराज्यस्तथागत्य श्रीकामः श्रियमाप्नुयात् यं यं प्रार्थयते कामं तं तं मा
प्नोति पुष्कलं निष्कामः कुरुते यस्तु परं ब्रह्म स गच्छति १४ इति लक्षहोमः अथ कोटिहोमः तत्रादौ युतहोमलक्षप्र·
करणं एवं निमित्तान्युक्तानि भविष्योत्तरे संवरण उवाच भगवन्महदुत्पातसंभवे भूप्रकंपने निर्घातपांसुवर्षे च

ग्रहभंगेतथैवच १ जन्मनक्षत्रपीडासुत्वनावृष्टिभयेषुच क्रूरासद्ग्रहपीडासुदुर्भिक्षेराष्ट्रविग्रहे २ व्याधीनांसं
शां·म· भवेजातेशरीरेचातिपीडिते क्लेशेवहुतिचोत्पन्नेकिंकर्त्तव्यंनरोत्तमैः ३ स्वर्गस्यसाधनंयत्तत्कीर्तितंसाधनंत
१८ थाप्रब्रूहित्वंद्विजश्रेष्ठतथारोग्यप्रदंनृणां ४ सनत्कुमारउवाच शृणुराजन्प्रवक्ष्यामिशांतिकर्मणएनुत्तमं को
टिहोमाख्यमतुलंसर्वकामफलप्रदं ५ ब्रह्महत्यादिपापानियेननश्यंतितत्क्षणात् उत्पाताप्रशमंयांतिमह
18 त्सपद्यतेसुखं ६ विधानंतस्यवक्ष्यामिशृणुष्वैकमनाभव देवागारेचभवनेतीर्थेवाशिवसन्निधौ ७ पर्वतेवा·
थकुर्वीतपश्चक्षेत्रेममात्मनः शुभनक्षत्रयोगेचवारेसर्वगुणान्विते ८ यजमानस्यानुकूलेकोटिहोमसमाचरे
त् पूजनीयाप्रयत्नेनब्राह्मणान्वेदपारगान् ९ वस्त्रैर्विभूषणैश्चैवगंधमाल्यानुलेपनैः प्रणम्यविधिवत्त
स्मैचात्मानंविनिर्दयेत् १० त्वंमेयतःपितामातात्वंगतिस्त्वपरायणं त्वत्प्रसादेनविप्रर्षेसर्वमेस्यान्मनोगतं ११
आपद्भिमोत्ताचमेकुरुयज्ञमनुत्तमं कोटिहोमाख्यमतुलंशांत्यर्थेसर्वकामिकं १२ पुरोहितस्ततःप्राज्ञःप्रा
ज्ञावरधरःशुचिः ब्राह्मणैःसंवृतःपुण्यैःसंयतःसुसमाहितैः १३ भूमिभागेसमेशुद्धेप्रागुदक्प्रवणेतथा
पुण्याहंवाचयेत्पूर्वंकृत्वाविप्रांश्चभोजयेत् १४ ततःसमाहितोविप्रैःसत्रपेन्मंडपंशुभंउत्तमंशतहस्तंतुनद
र्धेनतुमध्यमं १५ अधमंतुतदर्धेनशक्तिकालाद्यपेक्षया मध्येतुमंडपस्याप्यकुंडंकुर्याद्विचक्षणः १६ अष्टहस्त
प्रमाणेनआयामेनतथैवच मेखलात्रितयंतस्यद्वादशांगुलविस्तृतं १७ तत्प्रमाणात्तथायोनिंकुर्वीतसुसमाहि १८
तःकुंडस्यपूर्वभागेतुवेदिंकुर्याद्विचक्षणः १८ चतुर्हस्तासमाचैवहस्तमात्रोच्छ्रितान्त्वप स्थापनंदेवतानांचकुर्या

यत्नेनबुद्धिमान् १९ उपलिप्यततोभूमिंमंडपस्यप्रकल्पयेत् स्थापयेद्विजसर्वांस्ततोरणानिविचक्षणः २० ए
वंसंभृतसंभारःपुरोधाःसुसमाहितः पुण्याहजपघोषेणहोमकर्मसमाचरेत् २१ स्थापयित्वाहरान्वेद्यांवक्ष्यमा
णानरिंदम ब्रह्माणंपूर्वभागेतुमध्येदेवंजनार्दनं २२ पश्चिमेतुतथारुद्रंवसून्नुत्तरतस्तथा ईशान्यांचग्रहान्स्था
पयेन्नाग्नेय्यांमरुतस्तथा २३ वायुसोम्यांतथेशान्यांलोकपालाननुक्रमात् एवंसंस्थाप्यविबुधान् यथास्थानेनृ
पोत्तम २४ पूजयेद्विधिवद्देवैर्गंधमाल्यानुलेपनैः वेदोक्तमंत्रैस्तल्लिंगैःपुराणोक्तैःपृथक् पृथक् २५ आदि
त्यावसवोरुद्रालोकपालास्तथैवच ब्रह्माजनार्दनश्चैवशूलपाणिर्महेश्वरः २६ अत्रसंनिहिताःसर्वेभवंतु
मखभागिनः पूजांगृह्णंतुसर्वेत्रमयाभक्त्योपपादितां २७ एवंकुर्वंतुशुभंसर्वेयज्ञकर्तुःसमाहिताः एवंसंपूजयित्वा
तुदेवान् यत्नेनशुद्धधीः २८ नैवेद्यैर्विविधैर्भक्ष्यैःफलैश्चवस्त्रशोभितैः तत्रस्थैर्द्विजैःसर्वैःकुंडस्यविधिपूर्वकं २९
कुर्यात्संस्कारकरणंयथोक्तंवेदवित्तमैः ततःसमाहूयेदग्निनामाख्यातंघृतार्चितं ३० नियोजयेद्द्विजान्तत्रशांतसं
ख्यान्नृपोत्तम अलाभेतुवहूनाचयथालाभंनियोजयेत् ३१ विद्यावित्तवयोवृद्धान् गृहस्थान् संयतेंद्रियान् स्वक
र्मनिरतानवृद्धान् ज्ञानशीलान्प्रयत्नतः ३२ चिंतयेत्तत्रदेवेशंपंचास्यंतपपावकं मुखानितस्यचत्वारिसप्तजि
ह्वानिपार्थिव ३३ एकजिह्वमथैकंतुतस्यतंसार्वकामिकं धूमाप्यमानेनतथाहोतव्यंज्वलितेनच ३४ ऋग्भिःपू
र्वमुखैःकार्यायजुर्भिश्चोत्तरामुखैः सामभिःपश्चिमेकार्यःपूर्वदक्षिणाभिर्मुखैः ३५ आघारावाज्यभागौतुपूर्वंहु
त्वाविचक्षणः परितश्चपरिस्तीर्णेकल्पितेयतथासने ३६ ब्राह्मणःपूर्वमेवंतुसर्वंपश्चात्समाचरेत् होमोव्याहृ

तिभिश्चैवसर्वसत्त्रविधीयते ३७ प्रणवादिभिश्चतल्लिंगैःस्वाहाकारांतयोजितैः जुहुःयात् सर्वदेवानांवेद्यायेचाव
प्रो·म· कल्पिता ३८ एवंप्रकल्पयेयत्तंकोटिहोमाख्यमुत्तमं तिलाःप्रोक्ताःघृताभ्यक्ताकिंचिद्व्रीहिसमन्विताः ३९ किंचिद्य
वसमायुक्ताहोतव्याइतिकचित्पाठः होतव्याकोटिहोमेतुसमिधःस्रुपलाशजाः ४० पूर्णेपूर्णेसहस्रेतुदद्यात्पूर्णा
१९ हुतिंशुभां पंचमेनतुमुखेराजन् सर्वकामार्थसिद्धये ४१ पूर्णाहुत्याःसमाख्याताःकोटिहोमेनराधिप सहस्रा
णितुपञ्चेष्टदशशास्त्रविशारदैः ४२ आरंभदिनमारभ्यब्राह्मणैःर्ब्रह्मवादिभिः होतव्यंजपमानैश्चअथर्ववास्तुपुरो
19 क्रो हितैः ४३ धलोभाद्दयोदोषावर्जनीयाप्रयत्नतः यजमानेनराजेंद्रसर्वकामानभीप्सितान् ४४ मात्स्ये अस्माच्छ
तगुणःप्रोक्तःकोटिहोमःस्वयंभुवं आहुतीभिःप्रयत्नेनदक्षिणाभिफलेनच ४५ पूर्ववत्ग्रहदेवानामावाहनविस
र्जने होममंत्रास्तएवोक्तानदानेतथैवच ४६ कुंडमंडपवेदीनांविशेषोयंनिबोधमे कोटिहोमेचतुर्हस्तंचतुरस्रं
चसर्वशः ४७ योनिवक्त्रद्वयोपेतंतदप्याहत्रिमेखलं सर्वशश्चतुर्हस्तमितिस्नाराघामखातेषित्पर्थः योनिवक्त्र
द्वयोपेतमितिएकयोनिःपश्चिमतोन्यादक्षिणतः इतिहेमाद्रिचक्रकंठ योनिकंठयुतमितिपितामहचरणाः वे
दिष्टकोटिहोमेस्याद्वितस्तीनांचतुष्टयं चतुरस्रासमानद्वित्रिभिर्वप्रैःसमाहृताः वप्रप्रमाणंप्रोक्तंवैवेदिकायास्त
थोच्छ्रयः उक्तमयुतहोमे तथाषोडशहस्तःस्यान्मंडपश्चचतुर्मुखः पूर्वद्वारेचसंस्थाप्यबह्वृचंवेदपारगं १ यजु
र्वेदंतथायाम्येपश्चिमेसामवेदिनं अथर्वणावेदिनंतद्दुत्तरेस्थापयेद्बुधः २ अष्टौतुहोमकाःकार्यावेदवेदांग· १९
वेदिनः एवंद्वादशतान्विप्रान् वस्त्रमाल्यानुलेपनैः ३ पूर्ववत्पूजयेद्भक्त्यासर्वाभरणभूषितैः रात्रिसूक्तंचरो·

इंद्रंचपावमानंस्तुमंगलं ४ पूर्वेणोवह्वृचः शांतिंपठत्वाशउदङ्मुखः शाक्तंरौद्रंचसौम्यंचकौष्मांडंशांतिमेवच ५
पठेत्दक्षिणेहारियाजुर्वैदिकस्तनमं सौपर्णमथवैराजमाग्नेयरौद्रसंहिता ६ ज्येष्ठसामस्तथाशांतिच्छंदोगःप
श्चिमेपठेत् शांतिसूक्तंतथैवाचनथाशाकुनकंशुभं ७ पौष्टिकंचमहाराजउत्तरेणाप्यथर्ववत् पंचभिःसप्तभि
र्वाथहोमःकार्योयथपूर्ववत् ८ स्नानेदानेचमंत्राःस्युस्तपवमुनिसत्तम वसोर्द्धाराविधानंतुलक्षहोमवदिष्यते ९
अनेनविधिनायस्तुकोटिहोमंसमाचरेत् सर्वान्कामानवाप्नोतिततोविष्णुपदंव्रजेत् १० यःपठेच्छृणुयाद्वापिग्रह
शांतित्रयंनरः सर्वपापविशुद्धात्माप्रदमिंद्रस्यगच्छति ११ अश्वमेधसहस्राणिदशचाष्टौचधर्मवित् कृत्वायत्
फलमाप्नोतिकोटिहोमात्तदश्नुते १२ ब्रह्महत्यासहस्राणिभ्रूणहत्यार्बुदानिच नश्यंतिकोटिहोमेनयथावदेव
भाषितं १३ इतिकोटिहोमः अथशतमुखकोटिहोमः संवरणउवाच बहुत्वात्कर्मणोब्रह्मन् कोटिहोमःसुदुष्क
रःकालेनमहताचैवकर्तुंशक्यःकथंचन १ नियमाब्रह्मचर्याद्याद्दुष्कराइतिमेमतिः निरोधोब्राह्मणानांचक्ष्मा
प्यादिसुदुष्करः २ कार्यालग्नुधीयस्त्वात्पर्वकालाद्यपेक्षया एवंहिज्ञायतब्रह्मन् सर्वशास्त्रेषुपठ्यते ३ कोटि-
होमस्यसंक्षेपंवदमेब्रह्मसंभव ४ सनत्कुमारउवाच शताननोदशमुखोहिमुखैकमुखस्तथाचतुर्मुखोमहा-
राजकोटिहोमोविधीयते ५ कार्यस्यगुरुतांज्ञात्वानेकमयमथर्वणः यथासंक्षेपतःकार्योकोटिहोमस्तथाशृणु
६ कृत्वाकुंडशतंदिव्यंयथोक्तमानसंमितं एकैकस्मिन्(कुंडेपरिभाविते)स्तथाकुंडेदशविप्रान्नियोजयेत् ७ स
यःपदेनविप्राणांसहस्रंपरिकीर्तितं एकैकस्यानघणितेग्नौसर्वतःपरिभाविते ८ एकस्यानात्सर्वतःसर्वस्मि

तु कुंडेपरिभाविते संस्कृतेऽग्नौ प्रणीत इत्यर्थः होमःकुर्यात् द्विजाःसर्वेकुंडेकुंडेयथोदितं यथाकुंडेष्वकृत्वेपिराज
शां·म· सूयेमहाक्रतौ ९ नचाप्यग्निवहुत्वंस्यान्नचयज्ञोपिभिद्यते यथाकुंडेशतंप्यत्रगृह्णताचिनियोजिते १० एकएवभवे।
यज्ञः कोटिहोमोनसंशयः एवंयः क्रियतेऽत्विग्भिर्व्याकुलैःकार्यगौरवात् ११ शतानननःसवित्तेयःकोटिहोमोनसंश
२० यः स्वल्पैरहोभिःकार्यःस्याद्दीर्घकालमदिकेपिवा १२ तदाद्दशमुखःकार्यःकोटिहोमेशुभेमते विप्राणांद्विशतेतत्र
प्रविश्यविनियोजयेत् १३ तेपिवित्तानशीलाःस्युर्हुतवंतोजितेंद्रियाः यत्रकुंडत्रयंकृत्वाविभज्यचविभावसुं १४ हो
मःकुर्यात् द्विजान्भूयःसंस्कृत्यविधिपूर्वकं शतंतत्रनियोज्यंचविप्राणांप्रविभज्यवै १५ मासमप्यवार्द्धमासोवाकार्य।
कालेसमुपस्थिते तदापिद्विमुखःकार्यःकोटिहोमोद्विचक्षणैः १६ तदनुस्वेच्छयायज्ञंयजमानःसमापयेत् कालेनव
हुधाराजनदाचैकमुखोभवेत् १७ एककुंडस्थितोवह्निरेकचित्तैःसमाहितैः यथालाभस्थितैर्विप्रैर्ज्ञानशीलैर्वि
चक्षणैः १८ नसंख्यानियमस्तत्रब्राह्मणानांनरोत्तमा नकालनियमश्चैवस्वेच्छायत्नःसउच्यते १९ आहृत्याकर्तुंका
मस्यचातुर्मास्यादिकमेवतत् तदाप्रसक्तःकर्तव्योयज्ञोयंसर्वकामिकः २० अथमेकमुखोराजन् कालेनवहुनाभवेत्
वहुविघ्नश्चकालोवैतस्मात्संक्षेपमाचरेत् २१ यतोवैविघ्नमायुश्चवित्तंचैवास्थिरंसदा अतःसंक्षेपतःकार्यंधर्मकार्यं
प्रशस्यते २२ ततःसमाप्तेयज्ञेतुकारयेत्समहोत्सवं शंखतूर्यनिनादेनब्रह्मघोषरवेणच २३ अन्ते ततस्तद्दद्य
विप्रान् ऋत्विजःश्रद्धयान्वितः एकैकंकनकंचैवकुंडलैर्विविधैर्नृप २४ गोशतंचैवदातव्यमश्वानांचशतंतथा सह
स्रंतुसुवर्णस्यसर्वेषामपिदापयेत् २५ ग्रामैर्गजैरथैरश्वैःपूजयेच्चपुरोहितं दीनांधकृपणान्सर्वान्वस्त्रान्नैर्धन

20

स्थापिपूजयेत् २६ मतस्थावभ्यथेस्तायाजैर्घटैः पूर्वकल्पितैः लक्षहोमोक्तमंत्रैणसदाविनयकारिणा २७ प
वेसमापयेद्यस्तुकोटिहोममखंशुभं तस्यारोग्यंश्रियारोग्यमायुर्वृद्धिस्तथैवच २८ सर्वपापक्षयश्चैवयांपतेन्स्पसं
नम अनावृष्टिभयंचैवउत्पातभयमेवच २९ दुर्भिक्षभयपीडाश्चप्रशामंयांतिभूतले एतत्पुण्यंपापहरंसर्वकामफ
लप्रदं ३० सनत्कुमारमुनिनापार्थिवायनिवेदितं सर्वोपसर्गशमनंभवनाशनंवायेकारयंतिमनुजात्पकोटिहो
मं भोगानवाप्यमनसोभिमतान्प्रकामंतेयांतिशक्रभुवनंभविशुद्धसत्वाः ३२ अत्रयद्येतेसाहस्रासाद्यस्काइत्ये
कसंज्ञयोपक्रांतेषुकुमारानातेषुनिकोपिमंत्रकेषुचयागेषुमथमस्याम्नातधर्मकस्यधर्माउत्तरेषुनाम्नातधर्मकेषुनि
कायित्वावांतरसामान्यात्सहस्रसाद्यस्काद्येकनामकत्वाच्चप्रवर्तंतइत्यष्टमेनिकायिनांतुपूर्वस्योत्तरेषुप्रवर्त्तेतेस्यादि
त्यत्रनिरूपणापि तथेहचतुर्विधोमहाराजकोटिहोमइतिचतुर्णांकोटिहोमत्वावांतरसामान्येनाम्नातधर्मस्यैकः
स्यैवस्यधर्मोअनाम्नातधर्मकेषुद्विषुसुत्वादिषुप्रवर्ततेतेनतेषांविकृतित्वं तत्रहिसुत्वेनावत्कुंडद्वयंप्रकृतितोभि
षुशतपंचाशत्पंचविंशतिहस्तमंडपेषुमध्यमनवमांशेकार्यं तस्यैवमध्यमेनवमांशेचकुंडंकुर्याद्विचक्षणः इति
प्रकृतौवचनेनात्रापितथाप्राप्ते तत्रकुंडद्वयंषड्षहस्तंशालत्वमितिहोमेषट्करसंप्रचक्षतइतिभविष्यत्पु
राणात् पंचहस्तेवा कुंडेपंचकरंप्रोक्तंदशलक्षहुतोक्रमात् दितितत्रांतराच्चदशलक्षोत्तरमेकोनकोटिपर्यंतंपं
षट्करेइत्यर्थः एकहस्तत्वमयुतहोमोयंप्राकृतंपरिमाणंतत्वदृष्टार्थपत्याप्राकृतंकार्यत्वाद्बाध्यते अर्थात्परिमाण
मितिकात्यायनोक्तेश्च पंचविंशतिहस्तेमंडपेमध्यनवांशेदक्षिणोत्तरयोः कुंडद्वयंनिविशतेकथंचित्प्रकृतिः।

तोष्टादशांगुलमेखलाप्राप्तेः इतरयोरुक्तमंडपयोः सुगम एव निवेशः एवं दशमुखेपि प्राक्तेनैकहस्तत्ववाधेन पंचक
प्रां॰ म॰ रातिषट्कराणि द्वादशकुंडानि तेषु प्रत्येकं दशांगुलत्वाप्राहुतयः तत्र पंचविंशतिहस्ते मंडपे मध्यमांशे पूर्वादिषु चतसृ
दिक्षु मध्ये संलग्नानि चत्वारि कुंडानि प्राक्तिनमध्यमांशाधिकरणत्वस्यायावत्संभवमनुग्रहस्यान्याय्यत्वात् प्राचीनव
२१ मांशे तु प्राक्तनी चतुःकराः कराद्धीसमस्तस्य शेषेषु षट्कुंडानि यः कश्चिदेकोंशः क्त रिक्त एव कुंडद्वयं मध्यमांशे अष्टस्वंशे
षु अष्टाविंशत्यपि केचित् शतमखेपि पंचविंशतिहस्तेतावन्मंडपे शतकुंडानिवेशो वाधितएव पंचाशद्धस्तेयद्य
21
पि संभवति तथापि सहस्रविप्राणांमुखेन निवेशो वाधितः अतः शतहस्त एव निवेश उच्यते तत्र मध्यमांशे प्राग्भा
गे गुदक्संस्थापंचानामेकापंक्तिः तेषां च कुंडानां प्रत्येकमंतरं सप्तहस्तां सप्तांगुलानि च सार्द्धपंचहस्ताश्चत्वार्यंगुला
नि चायतः प्रतीच्यामेवान्यत्पंक्तिपंचकार्यं पंक्तीनामंतरे चाष्टौ हस्ताः अष्टांगुलानि च एवं विंशतिकुंडानि मध्यभागे
अन्येषु सप्तसु भागेषु द्वे द्वे अष्टसु दिक्षु षष्टावष्टाविति प्रत्येकं द्वादशेति ननु शतकुंडेषु प्रत्येकं लक्षाहुतिप्राप्तेः नत्वे
तत्सर्वः कोटिहोमपक्षे संभवति कृत्वाकुंडशतं दिव्यं यथोक्तं हस्तसंमितं शतमुखप्रकरणे कुंडानां हस्तपरिमाणेणो
क्तेरिति चेन्न तत्र केचित् हस्तसंमितमित्यत्र हस्ताभ्यां हस्तैर्वा संमितं विग्रहेण द्वित्रिचतुर्हस्तानामपि पूज्यते द्विहस्तेपि तु
लक्षमाहुतयः समांत्येव अतएव हेमाद्रौ अयुतेत्वथहोतव्ये कुंडं स्याद्धस्तमात्रकं द्विगुणं लक्षहोमेतु कोटिहोमे च
तुर्गुणमिति यद्यपि यौत्सर्गिकएकवचनात्तेनैव विग्रहस्तथाप्यनुपपत्याद्विवहुवचनांतेनापि क्रियते यथा सप्तदश॰
प्राजापत्यान् पशूनालभते इत्यत्र चोदकप्राप्तेकपशुनिष्पन्नहृदयाद्येकादशावदानगणनानुरोधेन प्रजापतिर्देव २१

तापस्यासौ प्राजापत्यः प्राजापत्यश्च प्राजापत्यश्च प्राजापत्या इति कृततद्धितानामेकशेषो न त्वाचार्यचेके इत्येकशेषो
त्तरं तद्धितः चोदकबाधापत्तेरित्युक्तं एवं च द्विचतुर्हस्तकुंडसंख्यापुरःसरं एकैकस्मिन्कुंडे लक्षमाहुतय इत्याहुः तानच
करणात्मक व्यासतुल्यशतेन षट्पंचचतुस्त्रिद्व्यंगुलानां पंचमेखलानां विंशत्यंगुलोच्चतया च मध्यावकाशाविर्भूयात्
एकैकहस्ते द्व्यपि स्यात्कृत्या एव लक्षमाहुतयः कार्याः अनारभ्याम्नातपंचमेखलापक्षेण प्राकृतमेखलात्रय एवाधस्ता।
पदिष्टा एकहस्तत्वाविरोधेनेत्युक्तमाहुः अत्रैकस्मिन्कुंडे आज्यभागांतं कृत्वान्यकुंडेष्वग्निप्रणयनमिति केचित् त
न्न वारुणप्राचासिकदक्षिणोत्तरवेद्योस्तुष्टीयमानायां मारुत्यामाग्नेय्याघस्त्रहविर्भ्यां चाद्याज्यभागप्राजापत्यगानां
पृथगनुष्ठानवादिहापि तिसृ आहुतीर्जुहोतीति वक्ष्यमाणाभिन्नेषु कोटिसंख्याकेषु होमेषु लक्षशः प्राप्तकुंडेष्वनु
ष्टीयमाने स्वाज्यभागं वस्विष्टकृताद्यंगानुष्ठानमेदस्यैवमापत्वात् किंच अप्रमादार्थिनदीक्षाकालीनेन जागरणेन
दीक्षोपयुक्तसंभारसंरक्षणेपि प्रापनीयाद्यर्थसंभाररक्षणार्थानिदेशिकजागरणाहनि यदिहाप्यग्निसमिंधनार्थे आ
धानाहुतिः कथमप्यवायेवतत्र ब्रह्माचार्यकुंडस्थानौ समिद्धे कुंडांतरस्थानां समिंधनं भवति अतएवायुतहोमे पूर्व
लिखितनतहायब्रह्माकाचनवकुंडीपक्षे प्रधानायतनादग्निं विभज्य कुंडेषु प्रणीयनवाचार्या आज्यभागांतं कृत्वेमानां
होमशेषं समाप्य पूर्णाहुतिं त्वेकं तेनाज्यभागानां स्विष्टकृदादीनां चांगानां आहुति लिखनं प्रयोगपारिजातीये संग
कृते तदेव च कोटिहोमे चोदकात्प्राप्तिं प्राकृताष्टसंख्याबाधेन नवनवतिसंख्यामात्रं विधीयते यद्यपि प्रणयना
नंतरं तथापि तद्धर्मकं एवसर्वयागानामाहुतिरेव एतावानंतरं विशेषः शतसंख्यायां कुंडेषु वरसंख्याग्रहाद्या•

प्रा॰म॰ कारात्स्थलविशेषाद्व निवर्त्तते अग्निस्थापनोत्तरमेव प्रणयनं यत्तु प्रयोगपारिजाते मध्यकुंडात्प्रणयनमुक्तं त
न्न मात्स्यदक पर्वगर्गप्रचारवाधात्तेनतत्संरक्षणार्थं नैर्ऋत्यकुंडादेव प्रणयनं कार्यं अन्यथा कथं विद्युतहोमे मध्य॰
कुंडसद्भावात्तस्य च सर्वप्रधानभूतस्य दैवत्यत्वात्कथं वितत्तः प्रणयनं प्राप्तमवेत्तु मध्ये कुंडनिवेशाभावात्त्वन्ततोऽग्नि
२२ प्रणयनं मध्यस्थलसमीपवर्त्तिस्थनेककुंडेषु तु विनिगमनाविरहः सर्वोऽप्ययं कोटिहोमश्च वारस्मात्तत्र वर्णेः द्वैतनिर्ण
येस्तु विस्तृत इति नेह विस्तरः अथ प्रयोगमात्स्यानुसारिणी भट्टकृता पद्धतिप्रकारिणी अनुष्टुप्यहमत्र प्रयोगः कर्त्ताप्रा
रंभदिनात्पूर्वेद्युर्दिने दानमयुतवीयास्मत्तदुप्रकाराणमन्यतमप्रकारेण प्राचीं संसाध्य तत्र वितस्यफच्छायं मंडपनिवेशं
योग्यं चतुरस्रं चत्वरं कृत्वा पूर्वाह्ने देशकालौ संस्मृत्य अमुककर्मकर्त्तुं मंडपं करिष्ये इति संकल्प्य गणेशं कूर्मं शेषं वसुधां हि
जांश्च संपूज्य आगच्छ सर्वकल्याणि वसुधे लोकपावनि उद्धृतासि वराहेण सशैलवनकानन १ मंडपं कारयाम्यद्य त्वदूर्ध्वे सु
भलक्षणं गृहाणार्घ्यं मया दत्तं प्रसन्ना शुभदा भव इति २ वसुधायाः अर्घ्यं दद्यात् स्योना पृथिवीति तां प्रार्थयित्वा मंडपं दी
च्यां मध्ये वा कुंडं वेदिं च कुर्यात् मंडपश्चायुतहोमे षट्हस्तो दशहस्तो वा कुंडो हस्तमात्रं चतुरस्रं गुले कमेखला वेदिं मंडपोत्तर
भागे हस्तविस्तृतं नस्फ त्रिकोणाव प्रत्रयपयुतो कार्या तत्र प्रथमो वप्रस्त्र्यंगुलोच्छ्रायः तदुपरितनौ प्रत्येकं द्व्यंगुलोच्छ्रितौ वि
स्तारस्तु सर्वेषामपि प्रत्येकं अंगुलः लक्षहोमे तु मंडपो द्वादशचतुर्दशषोडशहस्तो पि कुंडं तत्र फलतः चतुःकरं तदेव
व्यासतो द्विकरं द्वित्रिचतुरंगुलोच्छ्रितमेखलं तत्रोपरितनी चतुरंगुलविस्तारा अधोगते द्वे पि प्रत्येकं द्व्यंगुलविस्तारे कुं २२
डादीशान्यां सार्धहस्तविस्तृता द्व्युच्छ्रितेषा नं प्रवणपूर्ववत् त्रिवप्रा वेदी कोटिहोमे तु प्रागतद्धषोडशाद्यतमहस्तो मंड

पः कुंडंतुअष्टहस्तंदशहस्तंषोडशहस्तंवाफलतः तत्त्वव्याससमाख्यानंमंडपमध्ये तस्यदक्षिणपश्चिमयो
र्योनिद्वयं वेदिश्च मात्र्यांदिहस्तविस्तृतेतिविशेषः द्विमुखदशमुखशतमुखेषुनिर्णयावसरेसन्निवेशउक्तः क
र्तामदिनेमासपक्षादिकंसंकीर्त्यश्रीकामादिः ग्रहपीडानिवारणकामोवायुतहोमंकोटिहोमंवाकरिष्ये इतिसंकल्प्य
गणेशपूजास्वस्तिवाचनमातृकापूजानांदि श्राद्धाचार्यादिवरणानिकुर्यात तत्रायुतहोमेचत्वारऋत्विजोहोवालक्ष
होमेद्वादशाष्टौचत्वारोवा कोटिहोमेषोडशहोमार्थचत्वारोद्वारजापकाः इतिद्वादश अयुतलक्षकोटिहोमेषुत्रिष्वपिषोडश
वा ब्रह्माचार्यविष्येकेतन्मध्यएवसर्वत्रवरणमंत्राश्च आचार्यस्तुयथास्वर्गेशक्रादीनांबृहस्पतिः यथात्वंममयज्ञेस्मि
न् आचार्योभवसुव्रत। यथाचतुर्मुखोब्रह्मास्वर्गेलोकेपितामहः तथास्मिन् ममयज्ञेस्यब्रह्माभवद्विजोत्तम २ अस्यया
गस्यनिष्पत्त्यैभवंतोभ्यर्थितामया सुप्रसन्नाःप्रकुर्वंतुशांतिकंविधिपूर्वकं ३ कोटिहोमेतुगुरुप्रार्थना त्वंमेयतःपिता
मातागतिस्त्वंचपरायणं त्वत्प्रसादेनविप्रर्षेसर्वंस्यान्ममनोगतं १ आपद्विमोक्षायचमेकुरुयज्ञमनुत्तमं कोटिहो
माख्यमतुलंसांगंपूर्णंसार्वकामिकमिति ततःसर्वानाचार्यादीन् स्वशाखीयनामर्त्विक शाखीयानांचपदार्थानाम
नु समयेनमधुपर्केणसंपूज्य स्रुक्माल्यानुलेपनैः सपत्नीकऋत्विक सहितोभद्रंकर्णेभिरितिवेदघोषेणमंडपंप्र
दक्षिणीकृत्यपश्चिमद्वारेणप्रविशेत् ततआचार्यःपदत्रसंस्थितंभूतं स्थानमाश्रित्यसर्वदा स्थानंत्यक्त्वातुतत्सर्वंयत्र
स्थं तत्रगच्छतु अपक्रामंतुभूतानिपिशाचाःसर्वतोदिशं सर्वेषामविरोधेनब्रह्मकर्मसमारभे इति २ इतिसर्षपान्वि
कीर्य शुचीवोहव्येति पंचतोन्विंद्रमितिचतसृभ्यां आपोहिष्ठेत्यादिभिश्च भुवंप्रोक्ष्यस्वस्त्ययनंतार्क्ष्यमितिऋग्द्वयंपठेत्

प्रा॰ म॰ ततोमंडपनिम्नत्रिभागेहस्तमितांवेदींकृत्वातस्यांवस्त्रंसंप्रसार्यतत्रसवर्णादि शलाकयानवरेखाःप्राक् पश्चिमाय
तान्नवचदक्षिणोत्तरायताः कृत्वामध्यकोष्ठचतुष्टयमेकीकृत्यप्रतिकोणंत्रिषुपदेषुसूत्रंदद्यात् तथाचतुर्विंशति
२३ रङ्गपादानिसंपद्यन्ते मंडलस्याग्नेयादिषुकोणेषुशंकुचतुष्टयं विशंतुभूतलेनागालोकपालाश्चसर्वतः मंडपेत्राव
तिष्ठंतु आयुर्बलकराःसदेतिमंत्रेणानिखाय अग्निभ्योप्यथसर्पेभ्योयेचान्येतान्समाश्रिताः बलिंतेभ्योप्रयच्छामि
पुण्यमोदनमुत्तमं १ नैऋत्याधिपतिश्चैवनैऋत्यांयेचराक्षसा बलिंतेभ्यः प्रयच्छामिसर्वेगृह्णंतुमंत्रितं २ ॐनमोवायु
रक्षेभ्योयेचान्येतान्समाश्रिताः बलिंतेभ्यप्रयच्छामिपुण्यमोदनमुत्तमं ३ रुद्रेभ्यश्चैवसर्पेभ्योयेचान्येतान् समाश्रिताः
बलिंतेभ्यः प्रयच्छामिगृह्णंतुसर्वतोमस्तुकाइतिमंत्रैः शंकुपार्श्वेषुयथाक्रमंप्रतिमंत्रेणमाषभक्तबलीन्दत्वा शांतिर्यशो
तिकाकांतिर्विशालाप्राणवाहिनी सतोचसुमनानंदासुभद्रानीलइतिनवप्रागायतरेखादेवताःपूजयित्वाहिरण्यासुप्र
भालक्ष्मीर्विभूतिर्विमलाप्रिया जयाबालाविशोकाइतिनवदक्षिणोत्तरायतरेखादेवताश्चसंपूज्यमध्येव्यस्तसमस्त
व्याहृतीभिर्वास्तुपुरुषमावाह्यवास्तोष्पतेप्रतीतिसंपूज्यबलिंदत्वामध्यपदचतुष्टयेवास्तोःहृदयेब्रह्माणमावाह्यपूजे
यित्वाहिरण्यासुप्रभालक्ष्मीर्विभूतिर्विमलाप्रिया जयाबालाविशोकाइतिनवदक्षिणोत्तरायतरेखादेवताश्चसंपूज्यमध्येव्य
स्तसमस्तव्याहृतिभिर्वास्तु पुरुषमावाह्यवास्तोष्पतेप्रतीतिसंपूज्यबलिंदत्वामध्यपदचतुष्टयेवास्तोहृदयेब्रह्माणमावा
ह्यपूजयित्वा ॐब्रह्मणेनमोबलिंसमर्पयामितिपायसादिबलिंदद्यात् ततःपूर्वपदद्वयेदक्षिणस्तनेऽर्यम्णेनमः दक्षि
णपदद्वयेजठरेदक्षिणभागेविवस्वतेनमः पश्चिमपदद्वयेजठरवामभागेमित्रायनमः वामहस्तेपृथ्वीधरायनमःस्त ॰ २३

दकपदद्वयेआग्नेयकोणेसूत्रद्विधाकृतब्रह्मपदद्वयेसंलग्नापदोत्तरार्द्धेदक्षिणहस्तेसावित्राय दक्षिणार्धेस
वित्रेच पर्वतेन्द्रस्यपदप्रवर्द्धितृषणयोर्विवुधाधिपाय तत्पश्चिमार्द्धेमेढ्रेजयंताय वायव्यपददक्षिणार्द्धेवामह:
स्तेराजयक्ष्मणे उत्तरार्द्धेरुद्रायईशानपदोत्तरार्द्धेउरसिआपः दक्षिणार्द्धेवक्षआपवत्साय ततोंतःपंक्तिगतेईशाना
२ यपदेदक्षिणार्द्धेशिरसिशिखिने तद्दक्षिणार्धपदेदक्षिणनेत्रेपर्जन्याय तद्दक्षिणपदयोर्दक्षिणश्रोत्रेजयंताय तद
क्षिणांसेकुलिशायुधाय तद्दक्षिणयोर्दक्षिणवाहौसूर्याय तद्दक्षिणयोर्दक्षिणवाहवेसत्याय तद्दक्षिणेसार्धेद
क्षिणकूर्परेभृशाय तद्दक्षिणाग्नेयपदार्धेदक्षिणप्रवाहोआकाशाय तत्पश्चिमार्धेतद्दक्षिणप्रवाहावेवयायवे तत्प
श्चिमयोर्दक्षिणपार्श्वेपवयहत्तनाय तत्पश्चिमद्वयेदक्षिणेरौयमाय तत्पश्चिमयोर्दक्षिणजानौगंधर्वाय तत्पश्चि
मसार्धेपदेदक्षिणजंघायांभृंगराजाय तत्पश्चिमेनैऋत्यपदार्द्धेदक्षिणस्फिचिमृगाय तदुत्तरार्धेपादयोःपितृभ्यःत
दुत्तरेसार्धपदेवामस्फिचिदौवारिकाय तदुत्तरयोवाजघायासुग्रीवाय तदुत्तरयोः वामजानौपुष्पदंताय तदुत्तरयो
वामपार्श्वेसुराय तदुत्तरयोसार्धपदेवामपार्श्वेशोषाय तदुत्तरेवायव्यार्धेवाममणिबंधेपापाय तत्प्रागर्द्धेवामवाहौ
रोगाय तत्प्राक्सार्धेवामप्रवाहावेवयवाहवे तत्प्रागर्द्धेवामकूर्परेमुख्याय तत्प्राग्द्वयेवामवाहौभल्लाटाय तत्प्राग्द्व
येवामवाहवेसोमाय तत्प्राग्द्वयेवामांसेसर्पाय तत्प्राक्सार्धेवामश्रोत्रेअदितये तत्प्रागर्द्धेवामनेत्रेदितये ततउत्तरेवा
स्तोष्पतेश्रुतिवास्तोष्पतिं ततोमंडलाद्बहिरीशानादिषुचरक्यैविदार्यैपूतनायैपापराक्षस्यै तत्पूर्वादिषुस्कंदाय अर्य
म्णे जंभकाय पिलिपिच्छाय पुनःपूर्वादिषुइंद्रादीन् ततोमंडलादीशानेकलशंसंस्थाप्यतत्रवरुणंतत्रापामीत्या

प्रा॰म॰ वास्तुपूजयेत् यथा मेरुगिरेः शृंगं देवानामालयः सदा तथा ब्रह्मादिदेवानां मम यज्ञे स्थिरो भवेदिति प्रार्थयेत् तत
उदुंबरादि समिति लाज्यैः सतंत्रं स्थंडिले अष्टाविंशतिरष्टौ वा प्रत्येकं तत्तन्नाममंत्रैर्हुत्वा वास्तोष्पत इति चतसृभिश्च हुत्वा अथवा
२४ वास्तोष्पते नम इति मंत्रेण पंचविंशत्व फलानि हुत्वा स्विष्टकृदादि पूर्णाहुत्यंतं कुर्यात् ततो मंगलदेवताभ्यः पायसं बलिं द
त्वा कृणुष्व पाज इति सूक्तादिना मंडपं त्रिःसूत्रावेष्टयित्वा वास्तुकलशोदकेन यजमानमभिषिच्य पुनः संपूज्य यथाशक्ति द
क्षिणां दत्वा ब्राह्मणान् भोजयेदिति शारदातिलकेनु होमो नोक्तः तिलाज्यादिद्रव्याणां विकल्प इति ग्रंथांतरे इति वास्तुपू
जाः मात्स्ये उपोषितास्ततः सर्वे कृत्वैवमधिवासनमिति पाद्मे उपवासी भवेद्देवमशक्तो नक्तमिष्यत इति सद्योधिवासनं
वाथ कुर्याद्यो विमलो नर इति तंत्रे वोक्तं अधिवासनेनैवं तत्र द्वारपूजा पूर्वद्वारे द्वारश्रियै नमः ऊर्ध्वदेहल्यै अधः वामद।
क्षिणस्तंभयोर्गणेशाय स्कंदाय नमः द्वारस्थितकलशद्वयो गंगायै यमुनायै दक्षिणद्वारे द्वारश्रियै नमः ऊर्ध्वदेहल्यै।
श अधः स्तंभयोः पुष्पदंताय नमः कपर्दिने कलशद्वये गोदावर्यै कृष्णायै नमः इति पश्चिमद्वारे द्वारश्रियै ऊर्ध्वदेहल्यै अधः स्तं
भयोर्नंदीने चंडाय नमः भृंगिणे कलशद्वये रेवायै ताप्त्यै उत्तरे द्वारश्रियै ऊर्ध्वदेहल्यै अधः स्तंभयोर्महाकालाय नमः।
भृंगिणे कलशद्वये वाण्यै इति द्वारपूजा अथ तोरणपूजा तत्र पूर्वे बहिर्हस्तमात्रे वटतोरणमाश्वत्थं वा वासुदेवद्व॰
नामकं वा संस्थाकितमग्निमीले इति मंत्रेणाभ्यस्य संपूज्य राहुबृहस्पती तत्रस्थौ सितं पूजयेच्च तत्रैककलशः स्थाप्यः ततो मही
द्यौरिति भूप्रार्थना ॐ ओषधयः समिति तत्र यवप्रक्षेपः आकलशेष्विति कलशनिधानं इमं मे गंग इति जलपूरणं गंधद्वारा २४
मिति गंधप्रक्षेपः ॐ ओषधीरिति सर्वौषधीः ॐ ओषधयः समिति यवान् कांडादिति दूर्वा अश्वत्थे पंचपल्लवान् स्योनाइ॰

थिवीइति पंचमृदः याःफलिनीरिति फलं सहिरत्नानीति पंचरत्नानि हिरण्यरूपइति हिरण्यं युवासुवासाइति वस्त्रादि
नावेष्टयेत् पूर्णादर्वीति धान्यपूर्णपात्रमुपरिनिदध्यात् तत्र भूवावाहनं पूजनं च ततोदक्षिणे ओंइंद्रवरंलानंवासभद्रं विक
टंवाचक्रांकितं तोरणं ईषेत्वोर्जेत्वेति निधाय पंचंदनादिभिरर्चितं कृत्वा सर्षमंगारकं च तत्र न्यसेत् ततः पूर्ववत् कलश
स्थापयित्वा तत्र धारामावाह्यार्चयेत् ततः पश्चिमे लाक्षमोइंद्रवरंवासक्कर्मस्नभीमं गदांकितं तोरणमग्न आयाहीति न्य
स्य संपूज्य चंदनादिनाचर्चितं कृत्वा बुधं च तत्र न्यसेत् ततः पूर्ववत् कलशं स्थापयित्वा तत्र वाक्पतिमावाहनपूज
नादि तत्र उत्तरे न्यग्रोधमाश्वत्थपालाशं वासहेतेंद्रसप्रभं वा पद्मांकितं तोरणं शन्नो देवीति निधाय पूजितं कृत्वा सोमं के
तुं शनिं च तत्र न्यसेत् ततः कलशं स्थापयित्वा तत्र विघ्नेशावाहनपूजादि ततः पूर्वद्वारशाखाद्वये कलशद्वयं दध्यक्षता
दियुक्तं पूर्ववत् स्थापयेत् ऐरावतं कलशद्वये न्यस्यार्चयेत् ततः पूर्वस्मिन् ऋग्वेदिनावृत्विजौ द्वावेकं वा शांतिसूक्तजपा
र्थं त्वेन त्वामहे हूण इति प्रत्येकं ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः अत्रिगोत्रस्तु विप्रेंद्रः ऋत्विक् त्वं मे मखे भवेति त
न्वाग्निमीले इति पूजयेत् एह्येहि सर्वामरसिद्धसाध्यैरभिष्टुतो वज्रधरामरेश संवीज्यमानोप्सरसां गणेन रक्षाध्वरं नो भ
गवन्नमस्ते ओंइंद्र इहागच्छ इह तिष्ठेती इंद्रं सांगं सपरिवारं सायुधं सशक्तिकं द्वारकलशे आवाह्य त्रातारमिंद्रमिति पूज
यित्वा आशुः शिशान इति पीतां पताकां पीतध्वजं चोच्छ्रयेत् ऐरावतस्थं पीतवर्णं सहस्राक्षं दक्षिणवामहस्तस्थवज्रोत्पलमिं
द्रं ध्यात्वा ईशः सुरपतिः श्रेष्ठो वज्रहस्तो महाबलः शतयज्ञाधिपो देवस्तस्मै नित्यं नमो नमः इति नत्वा इंद्राय सांगाय
सपरिवाराय सायुधाय सशक्तिकायैतं माषभक्तबलिं दद्यात् ततः आचम्य आग्नेयकोणे गत्वा पूर्ववत् कलशं स्थापयि

त्वाननपुंडरीकमम्लत्तंचसंपूज्य एह्येहिसर्वामरहव्यवाहमुनिप्रवर्यैरभिजुष्टः तेजोवतालोकगणेनसार्धंममा
ग्रां·म· ध्वरंपाहिकवेनमस्ते भोअग्नेइहागच्छेहतिष्ठेतिसांगादिकं अग्निकलशेआवाह्यनत्वोन्नग्नेइत्यग्निंसंपूज्याग्निंदूतमि
२५ तिरक्तांपताकांरक्तध्वजंचोच्छ्रयेत ततश्छागस्थंरक्तंदक्षिणवामकरधृतशक्तिकमंडलुंयज्ञोपवीतिनमग्निंध्यात्वा·
ग्नेयःपुरुषोरक्तसर्वदेवमयोव्ययः धूमकेतूरजोध्यक्षस्तस्मैनित्यंनमोनमः इति नत्वाग्नयेसांगायेतंमाषभक्तबलि·
25 समर्पयामीतिदद्यात ततःकृत्वाचमनोदक्षिणेगत्वाप्रतिहारपूर्वंपूर्ववत्कलशद्वयंसंस्थापयित्वामनंदिग्गजंतत्रा
र्चयेत ततोयजुर्वेदिनोद्वावेकंवादक्षिणद्वारेशांतिसूक्तजपार्थंत्वेमत्वामहेव्हणीइसूक्तांकानराहोयजुर्वेदहस्तेष्टभोवि
श्वदेवतः काश्यपेयस्त्वविप्रेंद्रइरत्विकत्वंमेमखेभवइतिप्रत्येकंसंप्रार्थ्य ईषेत्वोर्जेत्वेतिपूजयेत ततः एह्येहिवैवस्वतधर्म
राजसर्वामरैरर्चितधर्ममूर्ते शुभाशुभानंदशुचांम धीशशिवायनः पाहिमखंनमस्ते भोयमइहागच्छेहतिष्ठेति सां·
गादियममावाहयमायसोममिति संपूज्यकृष्णांपताकांकृष्णध्वजंचापंगोरिमुच्छ्रयेत ततोमाहिषारूढंधृतदंडपा
शंदक्षिणवामकरंअंजनपर्वततुल्यस्वरूपमग्निसमलोचनंयमंध्यात्वा महामहिषमारूढंदंडहस्तंमहाबलं आवाहया
मियज्ञेस्मिन्पूजेयंप्रतिगृह्यतामितिनत्वासांगाययमायेनंमाषभक्तबलिंसमर्पयामीतिबलिंदद्यात ततआचम्यनैरृत्यां
पूर्ववत कलशंपूजयित्वाकुमुदंदिग्गजंदुर्जयंचसंपूज्य एह्येहिरक्षोगणनायकस्त्वंविशालवेतालपिशाचसंघैः स·
माध्वरंपाहिपिशाचनाथलोकेश्वरस्त्वंभगवन्नमस्तेभोनिरृतेइहागच्छेहतिष्ठेतिसांगमावाहयस्त्वनतइति संपूज्यनीलां २५
ध्वजंपताकांचमोबणइतिउच्छ्रित्य नरारूढंखड्गहस्तंनीलवर्णंमहाबलं महाकायंमहोरस्कंवद्वराक्षससंयुतंनिरृ

नयेएतंमाषभक्तबलिंसमर्पयामितिबलिंदद्यात् ततआचम्यपश्चिमेप्रतिहारशाखंकलशद्वयंनिधायांजनंदिग्गजंसम्पसा
र्चयेत् ततःसामगाऽऽत्विजाऽऽत्विजेनवाहूत्वासामवेदस्त्रुपिंगाक्षोजागतःशुक्रदेवतः भारद्वाजस्त्वृषिः शान्तिपाठं म
त्वेकुर्वितिप्रार्थ्यअग्रआयाहीतिपूजयित्वा ततपश्चिमेदिशिपाशोगणावारिधीनांगेणेनपर्जन्यमहाप्सरोभिः विद्याधरेंद्रा
मरगीयमानपाहित्वमस्मान् भगवन्नमस्ते इत्युक्त्वाभोवरुणइहागच्छेहतिष्ठेतिसांगंवरुणमावाहयत्वायामीतिसं
पूज्यश्वेतांपताकांध्वजंचेमंमेवरुणेतिउच्छ्रित्य मकरस्थंपाशहस्तंकिरीटिनंश्वेतवर्णंवरुणंध्यात्वा पाशहस्तंचव
रुणापर्णसांपतिमीश्वरं आवाहयामियज्ञेस्मिन् वरुणायनमोनमः इतितत्वासांगायवरुणायेतं माषभक्तबलिं
समर्पयामीतिबलिंदद्यात् ततउपस्पृश्यपवायव्यांपूर्ववत् कलशंस्थापयित्वापुष्पदंतंसिद्धार्थंचततश्चपूजयित्वापश्चेहि
यज्ञेममरक्षणायमृगादिरूढोमहसिद्धसंघैः प्राणाधिपःकालकवेःसहायगृहाणपूजांभगवन्नमस्ते भोवायोइ
हागच्छेहतिष्ठेतिसांगंवायुमावाह्य तववायवइतन्मस्यतइतिसंपूज्यवायोःशतमितिपताकांधूम्रांध्वजंचोच्छ्रित्यमृगारूढंचि
त्रांबरध्वजधरंदक्षिणवामहस्तेवायुंध्यात्वा वायुमाकाशगंचैवपवनंवेगवद्गति आवाहयामियज्ञेस्मिन् पूजे
यंप्रतिगृह्यतां। अनाकारोमहौजाश्चयस्यादृष्टगतिर्दिवि तस्मैपूज्यायजगतेवायवेहंनमामीतितत्वासांगायवायवेतं
माषभक्तबलिंसमर्पयामीतिबलिंदद्यात् ततआचम्योत्तरेप्रतिहारशाखंकलशद्वयंस्थापयित्वासर्वभौमंदिग्गजं
न्यसापूजयित्वाथर्ववेदार्त्विजावुत्तरद्वारेशांति सूक्तजपार्थंत्वेनाहंवृणइत्युक्त्वावृणान्नेत्राथर्ववेदोनुष्टुभोरुद्रदेवतः
वैशंपायनविप्रेंद्रशांतिपाठंमत्वेकुर्वितिप्रार्थ्यशन्नोदेवीरितिपूजयेत् पश्चेहियक्षेश्वरयत्तरक्षांविधत्स्वनःसत्रगणेन

ग्रो·मं·

२६

26

सार्धं सर्वौषधीभिः पितृभिस्सहैव गृहाणपूजां भगवन्नमस्ते ओं सोम इहागच्छेह तिष्ठेति सांगं सोमं आवाह्य वयं सोमे
तिसंपूज्य हरितां पताकां ध्वजं चाथायस्येति पसव नरयुतपुष्पकविमानस्थं कुंडलहारकेयूरसंशोभितं वरदगदाधरं दक्षि
णवामहस्तं मकुटिनं महोदरं स्थूलकायं ह्रस्वं पिंगनेत्रं पीतवस्त्रं श्रीवत्सवायं कुवेरं ध्यात्वा सर्वनक्षत्रमध्ये तु सोमो राजा
तु संस्थितः तस्मै सोमाय देवाय नक्षत्रपतये नमः इति नत्वा सांगाय सोमायैतं मासभक्तवलिं समर्पयामीति वलिं दद्या
त् ततईशान्यां गत्वाचम्य पूर्ववत्कलशं स्थापयित्वा सुप्रतीकं नामानं दिग्गजं मंगलं च तत्र पूजयित्वा एह्येहि विश्वेश्वर त्रि
शूलकपालखट्वांगधरेण सार्धं लोकेन यज्ञेश्वर यज्ञसिध्यै गृहाणपूजां भगवन्नमस्ते ईशानेहागच्छेह तिष्ठेति तमा
वाह्य नमीशानमिति संपूज्य श्वेतां सर्ववर्णां वा पताकां ध्वजं वाभिवाद्य देव सवितरित्युच्छ्रित्य वृषारूढं वरदं त्रिशूलयुत
दक्षिणवामहस्तद्वयं त्रिनेत्रं शुद्धस्फटिकवर्णमीशानं ध्यात्वा स्कंधसमारूढं त्रिशूलहस्तं त्रिलोचनं आवाहयामि
यज्ञेस्मिन् पूजेयं प्रतिगृह्यतां सर्वाधिपो महादेव ईशानः शंकर ईश्वरः शूलपाणिर्विरूपाक्षस्तस्मै नित्यं नमो नम
इति नत्वा सांगायेशानायैतं माषभक्तवलिं समर्पयामीति वलिं दद्यात् तत आचम्येशानपूर्वयोर्मध्ये गत्वा एह्येहि
गो पातालधरा महेंद्रमानंतेहागच्छेह तिष्ठेति सांगमनंतमावाह्यायं गौरीसंपूज्य मेचवर्णां श्वेतां वा पताकां ध्वजं चायं गौ
रित्युच्छ्रित्य अनंतशयनासीनं पूर्णसप्तकमंडितं शंखधरोर्ध्वदोर्दक्षिणकरद्वयं चक्रगदाधरोर्ध्वदोर्वामकरद्वयं
शयनासीनं पूर्णासिपन्नकमंडितं णकरद्वयं चक्रगदाधरोर्ध्वदोर्वामद्वयं नीलवर्णमनंतं ध्यात्वा यो सावनंतरूपे
ण ब्रह्मांडं सचराचरं पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः इति नत्वा सांगायानंतायैतं माषभक्तवलिं समर्पया

मीतिबलिंदद्यात् ततआचम्यनैर्ऋत्यपश्चिमयोर्मध्येगत्वा एह्येहि सर्वाधिपतेसुरेंद्रलोकेनसार्धंपितृदेवताभिः स
र्वस्यधातास्यमितप्रभावोविशाध्वरंनः सततंशिवाय ओंब्रह्मन्निहागच्छेहतिष्ठ तिब्रह्माणमावाह्यब्रह्मजज्ञानमिति
संपूज्यरक्तांपताकांध्वजंचब्रह्मजज्ञानमित्युच्छ्रित्यचतुर्मुखंहंसारूढमक्षमालांकुशामुष्टिधरोध्याधोदक्षिणाकरद्वयं· १५
स्रुवकमंडलुधरोर्ध्वाधोवामकरद्वयंमण्डलंजटिलंलंबोदरंरक्तवर्णंब्रह्माणंध्यात्वापद्मयोनिश्चतुर्मूर्तिर्वेदावासः पि
तामहः यज्ञाध्यक्षश्चतुर्वक्त्रस्तस्मैनित्यंनमोनमः इतिनत्वासांगायब्रह्मणेनमः माषभक्तबलिंसमर्पयामीतिबलिंद
द्यात् नैर्ऋत्यपश्चिमांतरालेनतद्बलिदानं ईशानपूर्वांतरालेब्रह्मबलिसमर्पणादानंचेतिरूपनारायणः ततआच·
म्यमंडपमध्येसुवृत्तंदंडोदशहस्तोदीर्घश्छिद्रहस्तविस्तृतः पंचहस्तोदीर्घोहस्तविस्तारोवामहाध्वजः किंकिण्यादिभु
क्तइंद्रस्यहस्तइतिस्थाप्यतत्रैवब्रह्मपूजनं ततोमंडपषोडशस्तंभेषुसर्वेभ्योदेवेभ्योनमः केचित्तुईशस्तंभेब्रह्मजज्ञा
नः ब्रह्माणंपूजयेत् एह्येहिब्रह्मन् अत्रस्तंभेआवाहनंपूजयेत् एवमग्नेपिहि इंद्रविष्णु· २० नमः शंभवेच· १
ज्ञातारमि· यंचित्रंदे· ४· गणानां· स· यमायसो· अ· आयंगौ· न· अश्विनाव· द· मरुतो· पउपन्नय· हा· वायवाया·
मध्येवेदिकोणेईशानस्तंभेः· त्र· ज्मयाअत्रतमस्त्वापाथ्यो· पुरंदरं १५ बृहस्पतिः १६ विश्वकर्मन्हषोडशानांपकप·
वबलिदानं वेशंभुकिंनरेभ्योनमः छष्टपन्नगेभ्योनमः इत्यर्चयेत् ततः पूर्वभागेउपलिप्तभूम्यावेद्युपविश्य त्रैलो
क्येयानिभूतानिस्थावराणिचराणिच विष्णुब्रह्मर्षिभिः सार्धंरक्षांकुर्वंतुतानिमे १ देवदानवगंधर्वयक्षराक्षसपन्नगाः
ऋषयोगावोदेवमातरएवच २ सर्वेममाध्वरेरक्षांप्रकुर्वंतुमुदान्विताः ब्रह्माविष्णुश्चरुद्रश्चदेवत्रपालगणैःसह ३

प्रा॰म॰
२७

रक्षंतु मंडपं सर्वे भूतरक्षांसि सर्वत इति पठित्वा त्रैलोक्यस्थेभ्यः पन्नगेभ्य ऋषिभ्यो मनुष्येभ्यो देवमातृभ्यो नमः इ
ति प्रत्येकं संपूज्य भूमौ माषभक्तबलिं दद्यात् ततो यजमानः सर्वैरृत्विग्भिः सह पश्चिमद्वारेण मंडपं प्रविश्य दक्षिणद्वा
र पश्चिमदेशे उपविश्य गुरुर्वादयो यथाविहितं कर्म कुरुध्वमिति वदेत् प्रतिकुंडमेकैकं कलशं ऋत्विग्भिः स्थाप्य इति
केचित् गुरुणा स्थाप्य इत्यन्ये ततो ऋग्वेदादिक्रमात् प्रागादिकुंडेषु ऋत्विजो ऽग्निं स्थापयेयुः ततो गुरुर्यजमानान्वितो
ग्रहवेद्यां सर्वतोभद्रमंडले देवताः स्थापयेदिति पितामहचरणाः यथा ग्रहवेद्यादिमंडलदेवतास्थापनमहं करिष्य इति
संकल्प्य स्थापयेत् तत्र मध्ये ब्रह्माणं गोतमो वामदेवो ब्रह्मा त्रिष्टुप् स्थापने पूजने च विनियोगः एवमुत्तरत्र ब्रह्मज
ज्ञानं॰ तत उदीचीमारभ्य वायव्यपर्यंतं कुवेरादीनायं तानष्टौ लोकपालान् तत्राप्यायस्व गोतमः सोमो गायत्री ओं आ १
प्यायस्व २ अभि त्वा जिगर्त्तः शुनः शेप ईशानो गायत्री ॐ अभि त्वा देव सवितः॰ इंद्रा वो मधुच्छंदा इंद्रो गायत्री ओं इंद्रं वो
विश्वतः ४ अग्निं काण्वो मेधातिथिरग्निर्गायत्री ॐ अग्निं दूतं वृणीमहे॰ ५ यमाय सोमं यमो ऽनुष्टुप् ॐ यमाय सोमं ६
दमो षुणो घोरः काण्वो निर्ऋतिर्गायत्री ॐ मो षुणः ७ तत्त्वा यामि शुनः शेपो वरुणस्त्रिष्टुप् ओं तत्त्वा यामि ८ वायो
शतं गोतमो वामदेवो वायुरनुष्टुप् ॐ वायो शतं ९ वायुसोममध्ये ष्टौ वसून् ज्मया अत्र मैत्रावरुणो वसिष्ठो वसवो ऽनुष्टु
प् ॐ ज्मया अत्र १० सोमेशानमध्ये एकादशरुद्रान् नु सामं होमस्सो द्वादशादित्या गायत्री ॐ मा तु न इंद्रियान् १२ इं
द्राग्न्योर्मध्ये अश्विनौ अश्विना राहूगणो गोतमो अश्विनावुष्णिक् ॐ अश्विना वर्त्ति १३ अग्नियममध्ये विश्वेदेवान् सपेतृ
कान् ओं मासो मधुच्छंद विश्वेदेवा गायत्री ओमासः १४ यमनिर्ऋतिर्मध्ये सप्त यक्षान् अभि त्वं वामदेवः सप्त यक्षाः प्र॰

आरुद्रासः एवावाम्य एकादश रुद्रा जगती ओं आ रुद्रासः ११ ईशानेंद्रमध्ये द्वादशादित्यान्

कृतिः ॐ अभित्यंदेवंसवितारमोण्योः कविक्रतुमर्चामिसत्यसवंरत्नधामभिः प्रियमतिंकविऊर्ध्वायस्यामतिर्भाअदि·
द्युतत्सवीमनिहिरण्यपाणिरमिमीतसुक्रतुःकृपास्व १५ निऋतवरुणमध्येभूतनागान् आप्येगोःसार्पराज्ञीसर्पागा
यत्री ॐ आयंगौः १६ वरुणवायुगंधर्वाप्सरसः अप्सरसमैत्रप्राकृष्यर्गोगंधर्वाप्सरसोनुष्टुप् ॐ अप्सरसांगंधर्वा
णां १७ ब्रह्मसोममध्येस्कंदनंदीश्वरम्मूलमहाकालौकुमारंकुमारस्कंदस्त्रिष्टुप् ॐकुमारंमाता १८ ऋषभंहृष·
भोवैराजोहृषभोनुष्टुप् ॐ ऋषभंमास १९ मूलमहाकालाभ्यांनमः ब्रह्मेशानमध्येइंद्रादीनसप्तअदितिलोकाबृ
हस्पतिवरुणोनुष्टुप् अदितिसूजः ब्रह्मेंद्रमध्येदुर्गांविलंचनामग्निवर्णां सोभरिर्दुर्गात्रिष्टुप्तामग्निवर्णां इदंविष्णुका
ण्वोमेधातिथिर्विष्णुर्गायत्री ॐ इदंविष्णु २३ ब्रह्माग्निमध्येस्वधांउदीनारंशांखःस्वधात्रिष्टुप् उदीरतामवरः २४
ब्रह्मयममध्येमृत्युरोगान् परंमृत्योःसंकुसुकोमृत्युरोगास्त्रिष्टुप् ॐ परंमृत्योअनु ब्रह्मनिर्ऋतिमध्येगणपतिगण
नांत्वामृत्समदोगणपतिर्जगति ॐ गणानांत्वा ब्रह्मवरुणमध्येअपः शन्नोवरीषसिंधुद्वीपआपोगायत्री शन्नोदे
वी २० ब्रह्मवायुमध्येमरुतः मरुतोयस्यराहूगणगोतमोमरुतोगात्री मरुतोयस्यब्राह्मणाः पादमूलेकर्णिका·
धः पृथिवींस्योनामेधातिथिर्भूमिर्गायत्री ॐ स्योनापृथिवी तत्रैवगंगादिनद्यः इमंमेसिंधुक्षितप्रैयमेधोगंगय·
मुनासरस्वत्योजगति ॐ इमंमेगंगेतत्रैवसप्तसागरान् धाम्नोधाजतोवरुणेनोमुंचपदायोअघ्न्या इतिवरुणेतिशाया
महेततोवरुणेनोमुंचमघिवायोमोषधीर्हिंसीरतोमृष्यवाभृत्तेनोवरुणेनोमुंच तदुपरिमरुनाम्ना वायुसोमादि
नसमीपेक्रमेणायुधानि गदांत्रिशूलंवज्रंशक्तिंदंडंखड्गंपाशंअंकुशंप्रांतद्वारेउत्तरादितः गौतमंभरद्वाजं विश्वा

ग्रा·मं·
२८

मित्रंकश्यपंजमदग्निंवसिष्ठं अत्रिमरुंधतीं · तद्वासे पूर्वादि इंद्राणीकौमारीब्राह्मीवाराहीचामुंडावैष्णवी माहेश्व
रीविनायकीमित्यष्टौशाक्तयः प्रतिष्ठाप्यप्रत्येकंसहावाह्यपूजयेत् ततस्तामेववेद्यांवस्त्रेलिखितंवक्ष्यमाणमंड
लेषुआदिदेवताःस्थापयेत् पूजयेच्च अस्मिन्कर्मणिग्रहादिस्थापनपूजनंचकरिष्यइतिसंकल्प्य प्रणवस्यब्रह्मा
ऋषिःपरमात्माग्निर्देवतादैवीगायत्रीछंदः व्याहृतीनांक्रमेणजमदग्निभरद्वाजभृगवऋषयः अग्निवायुसूर्यादेव
ताः दैवीगायत्रीदैवीउष्णिक दैवीबृहत्यश्छंदांसिसूर्याद्यावाहनेविनियोगःकेचिन्मंत्रान्यथावाहनेविदुः तत्रग्रहपी
म मध्येवर्तुलेप्राङ्मुखंसूर्यंरक्तपुष्पाक्षतैः आकृष्णेनहिरण्यस्तूपः सवितात्रिष्टुप् सूर्यावाहनेविनियोगः ॐआकृष्णेन
रजसा ॐ भूर्भुवःस्वःकलिंगदेशोद्भवकाश्यपगोत्रः सूर्यइहागच्छेत्यावाह्येहतिष्ठेतिस्थापयेत् एवंसर्वत्रमंत्रव्याहृ
तिकल्केहागच्छेहतिष्ठेतिस्थापयेत् ततआग्नेयचतुरस्रेप्रत्यङ्मुखंसोमंगंधश्वेतपुष्पाक्षतैराप्यायस्वगोतमःसोमोगाय
सोमावाहने·२ यमुनातीरोद्भवआत्रेयगोत्रततोदक्षिणेत्रिकोणेदक्षिणामुखंभौमंरक्तपुष्पाक्षतैः अग्निर्मूर्द्धाविरूपो
गारकोगायत्री अंगारकावाहनेवि· अवंतीसमुद्भवभारद्वाजसगोत्रभौम· ३ ततईशानेवाणाकारे उदङ्मुखंबुधंपीतपु
ष्पाक्षतैः उद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप्मगधदेशोद्भवआत्रेयगोत्रबुध·४ ततउत्तरतोचतुरस्रेउदङ्मुखंपीतपुष्पाक्ष
तैः बृहस्पतिगृत्समदोबृहस्पतिस्त्रिष्टुप् सिंधुदेशोद्भवः अंगिरसगोत्रंबृहस्पतेः ५ ततःपूर्वेपंचकोणेप्राङ्मुखंशुक्रं
शुक्लपुष्पाक्षतैः शुक्रःपराशरःशुक्रोद्विपदाविराट्भोजकटदेशोद्भवभार्गवसगोत्रशुक्र·६ ततःपश्चिमेधनुषिप्रत्य
ङ्मुखंशनिंकृष्णपुष्पाक्षतैः शमग्निरिरिटिंबिविःशनिरुष्णिकसौराष्ट्रजकाश्यपगोत्रशनैश्चर०७ ततोनैरृत्येशूर्पा

कारेदक्षिणामुखंराहुंकृष्णपुष्पाक्षतैः कयानोवामदेवोराहुर्गायत्रीराहावाहनेवि॰ राहिणापुष्पैरोद्भवेपैठीनसि
सगोत्रराहो ८ ततोवायव्येध्वजाकारेदक्षिणामुखंकेतुंधूम्रपुष्पाक्षतैः केतुंकृण्वंदाकेतवोगायत्रीअंतर्वेदिस
मुद्भवेजैमिनिसगोत्रकेतो ९ सर्वेषामादित्याभिमुखाः अथाधिदेवताः श्वेतपुष्पाक्षतैः क्रमात्सूर्यादीनांदक्षि॰
तःस्थाप्य ९ त्र्यंबकंवसिष्ठोईशोरुद्रोनुष्टुप् १ वि॰ सर्वज्ञेयः ३३ त्र्यंबकं ॐभूर्भुवःस्वः ईश्वरः गौरीर्मिमायदीर्घत
मा उमाजगतीसोमदक्षिणेपदक्रमोदीर्घतमास्कंदस्त्रिष्टुप् विष्णोदीर्घतमाविष्णुस्त्रिष्टुप् ४ ब्रह्मजज्ञानंनमवा
मदेवोब्रह्मात्रिष्टुप् ५ इंद्रोवोमधुच्छंदाइंद्रोगायत्री ६ यमायसोमंयमोयमोनुष्टुप् ७ मोषुणोघोरकरावःकालोगाय॰
त्री ८ उवाजंप्रस्कण्वोवषित्रगुप्तबृहती ९ एवमेवशुक्लपुष्पाक्षतैः ग्रहाणांवामभंत्रैतेव्याहृतीस्त्वेरिहागच्छेहति
ष्ठेतिमंत्रकालोक्तप्रत्यधिदेवतास्थापयेत् अग्निंकारावोमेधातिथिरग्निर्गायत्री ॐ अग्निंदूतं १ अप्सुमेमेधातिथिरापोनु
ष्टुप् २ स्योनामेधातिथिर्भूमिर्गायत्री ३ इदंविष्णुर्मेधातिथिर्विष्णुर्गायत्री इंद्रश्रेष्ठानिगृत्समदइंद्रस्त्रिष्टुप् ५ इंद्राणीवृषाक
पि इंद्राणीपंक्तिः ६ प्रजापतेहिरण्यगर्भप्रजापतिस्त्रिष्टुप् ७ आयंगौः सार्पराज्ञीसर्पागायत्री ८ ब्रह्मजज्ञानंगौतमो
वामदेवोब्रह्मात्रिष्टुप् ९ ततःशुक्लपुष्पाक्षतैः विनायकादीन् पंच गणानांत्वागृत्समदोगणपतिर्जगती राहोत्तर
तोविनायकं जातवेदसेकश्यपोदुर्गात्रिष्टुप् १ शनेरुत्तरतोदुर्गां २ तववायवृतस्पतेव्यश्व आंगिरसोवायुर्गायत्री रवेरु
त्तरतोवायुंपता मंत्रान् पठंतिसांप्रदायिकाः तत्रकेषुचिन्मंत्रेषुमूलंचिंत्यं ३ आदित्प्रत्नस्यवत्सआकाशोगायत्री
राहोर्दक्षिणेआकाशं ४ एषोउषाप्रस्कण्वोश्विनौगायत्री अश्विनाविहागच्छतमिहातिष्ठतमितिकेतोर्दक्षिणमश्वि

नै एतानिविनायकस्थापनानिचिंतामणेर्विनायकादीन् पंचउत्तराएवेतिसंप्रदायः इतिद्वात्रिंशद्देवताइतिरूपना
शां· रायणादयः हेमाद्रौतुलोकपालादीनामपिसूर्यादिग्रहाणांदिक्षुस्थापनमुक्तं तत्यथा इंद्र विभ्राजेवामयुष्मेंद्रसरं
२९ द्रोनुष्टुप् इंद्रइहागच्छेहतिष्ठेतिपूर्वेइन्द्रं एवमुत्तरत्र अग्निंमेधातिथिरग्निर्गायत्री यमायसोमंयमोनुष्टुप्सोमोष्णेचोरः कु
एवानिरितिगायत्रीः ४ त्वन्नोदग्नेवामदेवोवरुणास्त्रिष्टुप्तनवायो व्यस्वोवायुर्गायत्रीसोमोधेनुंगोतमः सोमस्त्रिष्टुप्तमी
29 शानंगोतमईशानोजगती सहस्रशीर्षानारायणोनंतोनुष्टुप् ईशानपूर्वयोर्मध्ये अनंतंब्रह्मयज्ञानंगोतमोवामदेवोब्रह्मात्रि
ष्टुप् नैऋत्यपश्चिमयोर्मध्येब्रह्माणीनत उत्तरेक्षेत्रपवामदेवः क्षेत्रपालोनुष्टुप् वास्तोष्पतेवसिष्टोवास्तोष्पतिस्त्रिष्टुप्·
ततोलक्षहोमेश्वेद्विंद्रमित्रमिति अनेनसामथ्वनिशरीरस्त्ववाहनः परमेष्ठिनः विषपापहरोनित्यमतःशांतिंप्रयच्छमे इत्यने
नचोत्तरेगरुत्मंतमावाहयेरवेः पूर्वेश्रोषंसोमस्याग्नेवास्तुकींभौमाग्नेनतक्षकंबुधोत्तरेकर्कोटकंबृहस्पतेरग्नेपद्मंशुक्रोत्तरेमहाप·
द्मंशनिपश्चिमेशंखपालंराहोः पुरःकंबलं केतोःपुरःकुलिकं पीठस्याच्यांअश्विन्यादिसप्तनक्षत्राणिविष्कुंभादिसप्तवयो
गात् ववबालवकरणे सप्तद्वीपानिऋग्वेदंच दक्षिणेपुष्यादिसप्तनक्षत्राणिधृत्यादिसप्तयोगात् कौलवतैतिलत्वकर
णेसप्तसागराणांयजुर्वेदंच पश्चिमेस्वात्यादिसप्तनक्षत्राणिवज्रादिसप्तयोगात् गरवणिजकरणेसप्तपातालानिसाम
वेदंच उत्तरेअभिजिदादिसप्तनक्षत्राणिसाध्यादिषड्योगात् विष्टिकरणः भूरादीन् सप्तलोकान् अथर्ववेदंचवायव्ये।
ध्रुवसप्तर्षींश्च अथयथावकाशंगंगादिसप्तसरितः सप्तकुलाचलान् अष्टौवसून् द्वादशादित्यान् एकादशरुद्रान् ए
कोनपंचाशन्मरुतः षोडशमातृः षट्ऋतून् द्वादशमासान् द्वेअयनेपंचदशतिथीः षष्टिवत्सरान् सूर्यान्नागान्स· २५

र्वान्पन्नगान् विद्याधरान् अप्सरसः रक्षांसि भूतानि मनुष्यान् कोटिहोमे तु वेदे पूर्वे ब्राह्मणमथ जनार्दनं पश्चिमे रुद्रं
उत्तरे स्कंदमिति एतानप्यावाहयेत् पूजयेच्च ततोस्मिन् कर्मणि देवतापरिग्रहार्थमन्वाधानं करिष्ये इति संकल्प्य चक्षुषी आ
ज्येनेत्यस्मात्कास्सूर्यादीन् ग्रहान् समिदाज्यनैवेद्यशेषचरुभिरष्टसहस्राष्टशतमष्टाविंशत्यष्टान्यतमसंख्ययादिदेवताप्रत्यधि
देवताविनायकादीन् लोकपालांश्चामुकसंख्यया एतैरेव द्रव्यैः क्षेत्रपालादींश्चामुकसंख्ययास्सूर्योयाः सर्वा देवता दशसंख्या
के तिलान् हुतिभिः अग्निं वायुं सूर्यं प्रजापतिं च प्रत्येकं पंचविंशतिशतमिति लक्षमिति तिलाहुतिभिर्यक्ष्ये लक्षहोमे पं
चविंशतिसहस्रमिताभिः कोटिहोमे पंचविंशतिमितालक्षाभिरिति शेषः ततः शेषेण स्विष्टकृतमित्यादि यक्ष्ये इत्यंतमुक्त्वा
समिद्द्वयमाधाय निर्वापादिक्रमेण गुडौदनादीन्नवान्यांश्च मुष्टीन् सूर्यो विंशति द्वात्रिंशान्येव चरून् अपयित्वा पंचभिः षोड
शाभिरुपचारैः संपूजयेत् तत्र वस्त्राणि यथावर्णानि विभौमयोरक्तचंदनं चंद्रशुक्रयोः श्वेतचंदनं बुधगुर्वोः कुंकुमयुतं श
निराहुकेतूनां कालागरुपुष्पाणि तत्तद्वर्णानि धूपास्तु वल्कीनिर्यासं घृताक्तं यवायवारालमगरु सिल्हकं विल्वपुनागुरुगु
ग्गुलं लाक्षालक्षाः क्रमाज्ज्ञेयाः आदत्वा उद्दीप्यस्वेति सर्वेभ्यो दीपं दत्वा गुडौदनं पायसं नीवारोदनं क्षीरषष्टिकं षाष्टीकौदनं दध्योद
नं तिलमाषयुतमोदनं चित्रौदनं च क्रमात् निवेदयेत् अधिदेवतादिभ्यस्तु वासो गंधपुष्पाणि गुग्गुलधूपः नैवेद्यं पायसादि
यथालाभं सूर्यादिद्वात्रिंशन्नामान्येषां प्रजापदार्थानुपसमयेनैव ततो वेदीशान्यां कलशं संस्थाप्य तत्र वरुणमावाह्य संपू
ज्याभिमंत्रयेत् तद्यथा कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः १ कुक्षौ तु सा
गरास्सर्वे सप्तद्वीपा वसुंधरा ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः २ अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः अ

त्र्गायत्रीसावित्रीशांतिपुष्टिकरीतथा ३ आयांतुयजमानस्यदुरितक्षयकारकाः देवदानवसंवादेमथ्यमानेमहोदधौ ४
ग्रं॰म॰ उत्पन्नोसितदाकुंभविधृतोविष्णुनास्वयं त्वत्तोयेसर्वतीर्थानिदेवाःसर्वेत्वयिस्थिताः ५ त्वयितिष्ठंतिभूतानित्वयिप्राणाःप्रति
ष्ठिता शिवःस्वयंत्वमेवासिविष्णुस्त्वंचप्रजापतिः ६ आदित्यावसवोरुद्राःविश्वेदेवाससपैतृकाः त्वयितिष्ठंतिसर्वेपियतःकाम
२० फलप्रदायकाः ७ त्वत्प्रसादादिमंयज्ञंकर्तुमीहेजलोद्भव सान्निध्यंकुरुमेदेवप्रसन्नोभवसर्वदेति ८ ततःफलपुष्पमाला
30 शोभितंवितानंबृहस्पतिदैवतं सूर्यादिभ्यइदंनममेत्युक्त्वागृहवेद्युपरिबध्नीयात् ततश्चावाज्यादीनाज्यभागांतेयजमानसर्वा
आवाहिताःसूर्यादिदेवताः अग्निवायुसूर्यप्रजापतिश्चोद्दिश्यसमिदाज्यतिलान् होतृसमस्तजेतममेतित्यजेत् ततश्चर्त्विजः
समिदाज्यनैवेद्यशेषचरून् क्रमेणावाहिताभ्योदेवताभ्योऽष्टाष्टसहस्रायुतमंत्रेसंख्ययासमस्तव्याहृतिभिर्वक्ष्यमाणतत्तन्मंत्रै
२ र्वाहुत्वाष्टेनाज्यतिलैस्ताभ्यएवदेवताभ्यः प्रत्येकंदशादशाहुतीर्हुत्वासोमंराजानमितिस्विष्टकृतंहुत्वा व्यस्तसमस्तव्याहृति
भिस्तिलैःरयुतंलक्षंकोटिंवाजुहुयुः तत्रहोमेऋग्वेदिनस्तावदावाहनमंत्रानेवपठंति यजुर्वेदिनोत्वंते आकृष्णेन
हिरण्यस्तूपः सवितात्रिष्टुप्सूर्यहोमप्रीतयेतिलाज्यहोमेविनियोगः आकृष्णेनइपत् स्वाहाइदंसूर्याय एवंसर्वत्र इमंदेवा
यवरुणः सोमोयजुः अइमंदेवायनाराजन् अग्निमूर्धाविरूपोंगारकोगायत्री उद्बुध्यस्वपरमेष्ठीबुधस्त्रिष्टुप् बृहस्पते
अत्ससमदोबृहस्पतिस्त्रिष्टुप् ५ अन्नात्प्रजापतिश्चाश्विसरस्वतीद्राक्षुक्रोजगती ६ शन्नोदेव्यद्धुंयथर्वणाश्शनिर्गायत्री ७ कयानो
वामदेवोराहुर्गायत्रीकेतुंमत्स्कंदाः के॰ ९ नवोगायत्री अथाधिदेवानां त्र्यंबकंवसिष्ठोरुद्रानुष्टुप् १ अत्रप्रणीतोदकस्य १
श्रीश्चतुनरनारायणउमात्रिष्टुप् २ यदक्रंदोभास्करजमदग्निदीर्घतमाःस्कंदस्त्रिष्टुप् ३ विष्णोरराटमुतथ्योविष्णुर्यजुः

५

ॐ विस्रोरराट॰ वेत्वा ४ आब्रह्मन् प्रजापतिर्ब्रह्मायजुः आब्रह्मन् कल्पतां ५ सजोषाविश्वामित्र इंद्रस्त्रिष्टुप् सजोषाइंद्रः ६
अस्तियमोभास्करजमदग्निर्दीर्घतमसोयमस्त्रिष्टुप् ७ अत्रप्रणीतोदकंस्पृशेत् कर्षिरसिदध्यङ्ङाथर्वणः कालोनुष्टुप् ८
अत्रापिप्रणीतोदकंस्पृशेत् चित्रावासोऽस्यत्रिष्त्रगुमोजगतीचित्रवासोः प्रणीयप्रथमध्यधिदेवानां अग्निदूतं स्वंप्रोवि
रूपाग्निर्गायत्री १ अश्मंतर्हृहस्पतिरापः पुरउस्णिक् २ स्योनामेधातिथिः पृथिविस्वर्गायत्री ४ त्रातारं गा ५ गयइंद्रस्त्रिष्टुप् अदि
त्येदध्यङाथर्वण इंद्राणीयजुः ६ अदितिरास्ना॰ स्नाषः प्रजापतेर्वरुणः प्रजापतिस्त्रिष्टुप् ७ नमोस्तुदेवाःसर्वानुष्टुप् ८॰
ब्रह्मप्रजापतिर्ब्रह्मात्रिष्टुप् ९ अथविनायकादिपंचानांगणानांत्वागणपतिर्यजुः गणानांत्वामम १ अंवेप्रजापतिर्दुर्गार
नुष्टुप् वातोवागंधर्वावात उस्णिक् प्रमाणतआवाहनेविनिमुक्तान् होमेपिपठंति नवग्रहाणांसमानकालपवग्रेन्पषात्
चोतं आवोराजानंवामदेवस्त्रिष्टुप् आपोहिष्ठामयोवरीषः सिंधुद्वीपउमागायत्री स्योनामेधातिथिःस्कंदोगायत्री इदंवि
स्नुर्मेधातिथिर्विस्नुर्गायत्री ४ त्वमित्सप्रथागौतमोब्रह्माबृहती इंद्रमिदेवतातवउक्षस्तुगिंद्रस्त्रिष्टुप् आयंगौः सार्पराज्ञीय॰
मोगायत्रीब्रह्मजज्ञानंगौतमोवामदेवः कालस्त्रिष्टुप् ८ यतस्तानकौसिकश्चित्रगुप्तोनुष्टुप् ६ अग्निंदूतंकाण्वोमेधातिथि॰
रग्निर्गायत्री १ उदुत्यमंगौतमोवामदेवआपस्त्रिष्टुप् २ पृथिव्यांनरिक्षंविस्नुः पृथिव्युस्णिक् सहस्रशीर्षानारायणोविस्नुर
नुष्टुप् इंद्रोयेमममरुत्वतो ५ उत्तानपर्णेसुभगे ६ प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् नमोस्तुसर्पेभ्योदेवाःसर्पाअनु
ष्टुप् ८ पषब्रह्मा प्रजापतिर्ब्रह्माद्विपदागायत्री ९ आतूनइंद्रकुशीदःकाण्वोगणपतिर्गायत्री १ जातवेदसेकश्यपोदु
र्गास्त्रिष्टुप् २ आदित्यस्याकाशोगायत्री ३ काण्वत्रितोवायुरुस्णिक् ४ आकाशादिभ्यस्तस्थापनंमंत्रापव प्रोषवास्तु

ग्रां म॰ काद्भिमूलप्रणवाद्याः स्वाहांतानाममंत्राएवलक्षकोटिहोमयोरिंद्रंमित्रमित्यनेनगरुत्मद्धोमः कोटिहोमेतुब्रह्मजनार्द
३१ नरुद्रस्कंदेभ्योपिनाममंत्रैर्होमः ततोयजमानोमंडपप्राग्द्वारकलशसमीपेत्रातारमिंद्रंगर्गइंद्रस्त्रिष्टुप् इंद्रप्रीत्यर्थंवलिदा
31 नेविनियोगः त्रातारमिंद्रं इंद्रायसांगायसपरिवारायसायुधायसशक्तिकायेतंदीपंमाषभक्तबलिं दद्यात् नममइतिसदी
पमाषभक्तवलिंदत्वाभोइंद्रदिशांरक्षवलिंभक्षममसकुटुंवस्यायुःकर्ताक्षेमकर्ताशुभकर्ताशांतिकर्तापुष्टिकर्तातुष्टिक
र्ताभवेतिप्रार्थयित्वाएवमाग्नेयादिषुहोमोक्ताग्न्यादिमंत्रैर्वलिप्रदानंप्रार्थनंच एवमधिदेवताप्रत्यधिदेवतासहितेभ्यःसूर्या
दिग्रहेभ्योपिहोमोक्तैरेव ततःआचार्योयजमानावारब्धस्त्रुचिस्रुवेणद्वादशवारंचतुर्वारंनारिकेलादिफलयुक्ताज्यंगृहीत्वापूर्ण
हुतींजुहुयात् तत्रमंत्राः समुद्रादूर्मिरितिद्वयस्यगोतमोवामदेवोग्निस्त्रिष्टुप् पूर्णाहुतौविनियोगः एवमग्रेपिविनियोगाः मू
र्धानंदिवोभरद्वाजोवैश्वानरस्त्रिष्टुप् पुनरग्निःसमुद्रादित्यापाःस्त्रिष्टुप् पूर्णादर्वि विश्वेदेवाः प्रातरुक्तानुष्टुप् सप्ततेअग्नेसप्त
वानग्निर्जगतीधामंतेविश्वामदेव अग्निर्जगतीधामंतेस्वाहेति यजमानस्तुइदमानयवैश्वानरायवसुरुद्रादित्येभ्यः प्रातरुक्ता
वेसप्तवतेवैश्वदेवेभ्यश्चनममेतित्यजेत् कात्यायनानांतुमूर्धानंदिववदित्येवस्तु पूर्णाहुतिमंत्रः अग्नयेनममः इतित्यागः साम
गानांतुप्रजापतिर्ऋषिर्गायत्रीछंदः इंद्रोदेवता यज्ञास्कामस्ययजनीयप्रयोगेविनियोगः पूर्णाहोमंयशसाजुहोमि यो
स्मैजुहोतिवरमस्मैददातिवरंवृणेयशसाभामेलोकेस्वाहेत्यनेनस्रुवेणैवंहोमः इंद्रायेदंनममेतित्यागः ततःवसोर्धारया
हुजुहोस्यामीतिसंकल्प्ययजमानोवसोर्धारांजुहुयात् मंत्रस्तु अग्निमीळइतिनवानांमधुच्छंदाअग्निर्गायत्री वसोर्धारायांवि ३१
नियोगः विश्वोनुकमितिषद्दीर्घतमाविष्णुस्त्रिष्टुप् आनेपितरनिपंचदशानांगृत्समदोरुद्रस्त्रिष्टुप् स्वादिष्ठयेति नवानामधु

ष्टुप्छंदः पवमानस्सोमो गायत्री महावैश्वानरसाम्नो महावैश्वानर ऋषिर्वैश्वानरो देवता पथ्याबृहती छंदः ज्येष्ठसाम्नो भरद्वा
ज ऋषिः वैश्वानरो देवता त्रिष्टुप् छंदः वसोर्धारायां विनियोगः वसोर्धारापान्न्होतीत्यनुवाकमपि पठंति शिष्या एवं वसो
र्धारां हुत्वा पूर्णपात्रविमोकादि च यथा प्राग्वत्समाप्याचार्यसहिता ऋत्विक्जास्सर्वौषधीभिरनलिमांगपत्नीपुत्रादिसहितं य
जमानं स्वस्वस्थाने यथाविधि मंत्रेण नवग्रहपीठसमीपस्थकलशोदकेन वाभिषिंचेयुः पौराणोयं तेषु सुरास्त्वामभिषिंचंतु ब्रह्माविष्णु
महेश्वराः वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः १ प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते आखंडलोग्निर्भगवान् यमो
वै नैरृतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा ३ कीर्तिर्लक्ष्मीर्धृतिर्मे
धा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः ४ एतास्त्वामभिषिंचंतु देवपत्न्यः समागताः आदि
त्यश्चंद्रमा भौमो बुधजीवसितार्कजाः ५ ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः देवदानवगंधर्वा यक्षराक्षसपन्नगाः ६
ऋषयो मनवो गावो देवमातर एव च देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ७ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च
औषधानि च रत्नानि कालस्यावयवाश्च ये ८ सरितः सागराः शैलास्तीर्थानि जलदा नगा एते त्वामभिषिंचंतु सर्वकामार्थसिद्ध
ये ९ इति नक्ष्योराहणीमहइति ततो यजमानः स्नात्वा शुक्लगंधधरः आचार्यादीन्संपूज्य तेभ्यो दक्षिणां दद्यात् तत्राचार्याय धे
नुं ब्रह्मणे कृष्णनड्वान् एवं सदस्यर्त्विग्द्वारपालादिभ्यो यथाशक्ति तथा धेनुशंखस्थालनड्वान् होमवासो हयं क्रमात् कृष्णा
गौरायसं छागं पतौवैद्दक्षिणाक्रमात् १ ग्रहानुद्दिश्य देयाः ततः शक्त्या ब्राह्मणान्भोजयेत् संकल्पयेद्वाशक्तौ ततो दीनाना
थेभ्यो भूयसीं दक्षिणां दत्वा मंडपदेवतानां महापीठे देवानां ग्रहपीठदेवानां चोत्तरे पूजां कृत्वा यांतु देवगणाः अभ्यारमिति द्व

ग्रां॰मं॰ ग्रयोः उत्तिष्ठब्रह्मणस्पतेइतिताउत्थाप्यविसृज्यमंडपादीन् प्रतिमादींश्चसर्वान् संभारानाचार्याय प्रतिपाद्य यथास्वस्त्या
चनामोक्त्वा प्रमादात्कुर्वतामितिपठित्वा कर्मेश्वरार्पणंकृत्वाशिषोगृहीत्वातान्नमस्कृत्यसुहृद्युतोभुंजीतेति सर्वंशिवं इ
३२ तिश्रीभट्टशंकरात्मजनीलकंठकृतः शांतिपरिभाषाप्रयोगः अथनवग्रहयोगशांतिः यामले दुर्भिक्षादिभयंचैव चतुर्ग्रह
समन्वये महारोगभयंराष्ट्रेतयोवृष्टिविनाशनं १ पंचग्रहसमायोगेदुर्भिक्षंशंकरादिकं नृपवैरंगर्भनाशोजायतेजनना
32 शनं २ ग्रहषट्कसमायोगेमंत्रिणांमरणंभवेत् पश्वश्वादिभयंसर्वेसकरादिजनक्षयः ३ पद्‌राज्ञोविनाशोवामयाभय
मथापिवा सप्तग्रहसमायोगेक्षितीशमरणंध्रुवं ४ जगत्प्रलयमेवापितदानिर्मानुषंजगत् अतऊर्ध्वंमहोत्पातनानादुःख
समाकुलं ५ सूर्यश्चेत् व्यतिरिक्तश्चेत्तदायोगोमहाद्भुतः विनाचंद्रेणयोगोपिजगत्प्रलयकारणं ६ नष्टेजातजंतूनामहा
रोगोमहाभयं अर्थनाशस्थाननाशोमानहानिश्चपीडनं ७ वातपित्तादिसंभूतमहापीडामहद्भयं समायोगग्रहाणांदोषा
न् कुर्वंतिसर्वदा ८ षण्मासाभ्यंतरेवापिआयुर्हानिः प्रियस्तथा जन्माष्टद्वादशेरा चतुर्थेपंचमेपिवा ९ पूर्वोक्तफलमे॰
वात्रतस्माच्छांतिंप्रयत्नतः कुर्याद्दोषानुसारेणवित्तशाठ्यंनकारयेत् १० ततःग्रहाकृतिंकृत्वासौवर्णेनप्रयत्नतः सुवर्णेनत
दर्धेनपादेनापिकनीयसी ११ वित्तशाठ्यंनकर्तव्यंशक्तितोनरैः पूर्वोक्तलक्षणेनैवग्रहमूर्तिंचकारयेत् १२ ग्रहस्यैककल
शंग्रहयोगप्रमाणतः कारयेत्तकुंडमेकंवानिर्व्रणंसुदृढंनवं १३ ग्रहस्यैशानदिग्भागेशुद्धदेशेसमस्थले कुंडेवास्थं
डिलेवाथहोमंकुर्याद्विधानतः १४ तस्यपूर्वोत्तरेदेशेपूजास्थानंप्रकल्पयेत् चतुरस्रंहस्तमात्रंस्थंडिलंतंडलेनतु १५ ३२
लिखेद्ग्रहाकृतिंतत्रस्थापयेत्प्रतिमांततः अधिप्रत्यधिदेवादीन् दक्षिणोत्तरतः क्षिपेत् १६ उक्तगंधैस्तथापुष्पैस्ततःमा

लैस्तथापलैः तत्तद्ग्रहोक्तमंत्रेण पूर्वोक्तेन च पूजयेत् १७ स्वस्तिवाचनपूर्वेण आचार्यो ऋत्विजैः सह ग्रहपूजादिकं कृत्वा
नैवेद्यांतं समर्पयेत् १८ ततो होमं प्रकुर्वीत स्वगृह्योक्तविधानतः चतुरस्रं प्रकुर्वीत कलशस्थापनं ततः १९ पूर्वोक्तेन वि
धानेन शुद्धतोयेन पूरयेत् पंचामृतं पंचगव्यं पंचत्वक् पंचपल्लवं २० तन्मंत्रैर्विनिक्षिप्य ओषधानि विनिक्षिपेत् तत्तद्ग्रहो
क्तविधिना मूलान्यादाय निक्षिपेत् २१ अलिंगैर्वाक्रियोर्वापि कलशं पूरयेद्बुधः तत्तद्ग्रहोक्तविधिधेस्तत्तन्मंत्रैर्हुनेद्यथा २२
चर्वाज्येन जुहुयात्पश्चात्तिलाहुतिमथाचरेत् अथ स्विष्टकृतं कृत्वा होमशेषं समाचरेत् २३ भद्रासनोपविष्टस्य यजमानस्य
ऋत्विजैः कलशस्योदकेनैकमभिषेकं समाचरेत् २४ योमम होक्तं मंत्रैश्च अधिप्रत्यधिदेवताः नवग्रहोक्तमंत्रैश्च जातवे
दादिकं चकैः २५ अंवकेनैव मंत्रेण तेन च स्वपतिना अपि यत इंद्र हयैनैव लोकपालाष्टकैरपि २६ सुरास्त्वामभिमंत्रेणायेन दे
वादयक्रमात् अन्यैश्च पुण्यसूक्तैश्च अभिषेकं समाचरेत् २७ अभिषेकान्तं वस्त्रमाचार्याय निवेदयेत् ततः शुक्लांवरधरः
कुर्यादाज्यावलोकनं २८ ऋत्विग्भ्यो दक्षिणां दद्याद्धेनुं शंखादिकानपि तदभावे यथाशक्ति हिरण्यमपि दापयेत् २९ ब्राह्म
णान् भोजयेत् पश्चात् यथाविभवसारतः एवं यः कुरुते भक्त्या ग्रहदोषविवर्जितः ३० पूर्वोक्तसर्वदोषैश्च विमुक्तः पुत्रवान्
सुखी आयुरैश्वर्यसंपन्नो जीवेद्वर्षशतं नरः ३१ इहलोके सुखी भूत्वा मृत्यौ मुक्तिं व्रजेत् ३२ इति ग्रहयोगशान्तिः अ
थ ग्रहस्नानानि विष्णुधर्मोत्तरे मंजिष्ठा मदमातंगं कुंकुमं रक्तचंदनं स्वर्णकुंभे कृतं ताम्रे सूर्यस्नानं विधीयते १ मदमातंग
गजमदः उशीरं च शिरीषं च कुंकुमं रक्तचंदनं शंखेषु स्नानमिदं स्नानं चंद्रदोषविनाशनं २ खदिरं देवदारुं च तिलानामलका
नि च स्वर्णकुंभे कृतं नैरोग्ये भौमपीडाविनाशनं ३ नदीसंगमतोयानि तन्मृदा सहितानि च न्यस्तानि कुंभे माहेये बुधपीडावि॰

ग्रां॰म॰
२२
33

माहेयेम्लेच्छस्ये औदुंबरंतथाश्वत्थविल्ववटमामलकांतथा न्यस्तंतकुंभेसौवर्णेजीवपीडावि॰५ गोरोचनानागमदः श
तपुष्पाप्रातावरी विन्यस्ताराजतेकुंभेशुक्रपीडाविना॰६ तिलान् माषान् प्रियंगुंचगंधपुष्पं तथैवच न्यस्तंकार्ष्णायसे
कुंभेसौरीपीडा॰७ गुग्गुलंहिंगुलंतालंमुभांचेवमनःशिलां शृंगेचमाहिषेन्यस्येद्राहुपीडा॰८ तालंहरितालं वराह॰
तांराजन् पर्वताग्रस्थदंतथा छागत्तीरंखड्गपात्रेकेतुपीडा॰९ वराहनिहतावराहोत्थानाखड्गोगंडकः उक्तंग्रहस्नानमि
दंसर्वपीडा॰१० इतिग्रहस्नाना अथादित्यशांतिः भविष्ये आदित्यवारेहस्तेन पूर्वंग्रहस्यविचक्षणः मंत्रोक्तविधिनासर्वं
कुर्यात्पूजादिकंरवेः १ प्रत्यर्कसप्तनक्तानिकृत्वाभक्तिपरोनरः ततस्तुसप्तमेप्राप्तेकुर्यात् ब्राह्मणभोजनं २ भास्करं
शुद्धसौवर्णंकृत्वायत्नेनमानवः ताम्रपात्रेस्थापयित्वारक्तपुष्पैःप्रपूजयेत् रक्तवस्त्रयुगच्छन्नंछत्रोपाहनयुगान्वितं
घृतेनस्नापयित्वाचलड्डुकान्विनिवेदयेत् ४ होमंघृततिलैःकुर्यात्तन्नाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशति
रेवच ५ होतव्यामधुसर्पिभ्यांदध्नाचैवघृतेनच मंत्रेणानेनविदुषेब्राह्मणायप्रदापयेत् ६ आदिदेवनमस्तुभ्यंसप्त॰
सप्तेदिवाकर त्वंरवेतारयस्वास्मानस्मात्संसारसागरात् ७ मंत्रेणानेनराजेंद्रभवेदारोग्यमुत्तमं द्रव्यसंपत्सुसंप्राप्तिरि॰
तिप्रोवाशौनकाविदुः ८ अपिसंवादिनात्येमशांतिःपुष्टिःसदान्नणां सूर्यपीडासुचोरासुकृताशीतिःशुभप्रदा ९ अथ
चंद्रशांति तत्रैव तद्धचित्रासुसंग्रहस्यसोमवारंविचक्षण अनेनैवोक्तविधिनाकुर्यात्पूजादिकंविधोः१ सप्तमे तत्ततःप्रा
प्तेकुर्याद्ब्राह्मणभोजनं कांस्यपात्रेप्रसंस्थाप्यसोमंरजतसंभवं २ श्वेतवस्त्रयुगच्छन्नंश्वेतपुष्पैःप्रपूजितं पादुको २२
पानहच्छत्रभोजनसंयुतं ३ होमंघृततिलैःकुर्यात्सोमनाम्नाचमंत्रवित् समिधोष्टोत्तरशतमष्टाविंशतिरेवच ४ होत

वामधुसर्पिर्भ्यांदध्नाचैवघृतेनच दध्यन्नंशिवरेकृत्वाब्राह्मणायनिवेदयेत् ५ मंत्रेणानेनराजेंद्रसम्यग्भक्त्यासम-
न्वितः महादेवजातिवल्लीपुष्पगोक्षीरपांडुर ६ सोमसौम्योभवास्माकंसर्वदातेनमोनमः अथमंगलशांतिः स्वा
मामंगारकंप्टसमायान्नक्तभोजनं नमाभूः सममेत्वणसंभामेहेमंतान्नेनिवेशयवै १ रक्तवस्त्रयुगच्छन्नंकुंकुमेनानु
लेपितं निवेद्यभक्तकंशारंपुष्पधूपाक्षतादिभिः २ होमंघृततिलैकुर्यात्कुजनाम्नाचमंत्रवित् समिधाष्टोत्तरशत
मष्टाविंशतिरेवच ३ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनच मंत्रेणानेनतंदद्याद्ब्राह्मणायकुटुंबिने ४ कुजःकृत्र
भवोपित्वंमंगलःपरिपठ्यते अमंगलंनिहत्याशुसर्वदायच्छमंगलं ५ एवंकृतेभौमकृतंदुष्कृतंशांतिमाप्नुयात् क-
र्तव्यंभौमपीडासुतस्मात्प्रयत्नमानसैः ६ अथबुधशांतिः विशाखासुबुधस्यसमन्नक्तान्यथाचरेत् बुधंहेममयंकृत्वा
स्थापयेत्कांस्यपात्रके १ शुक्लवस्त्रयुगच्छन्नंस्रुक्मालानुलेपनं गंधेदनैपसंभारंब्राह्मणायनिवेदयेत् २ बुधत्वंबु
द्धिजननोबोधवान्सर्वदानृणां तत्त्वावबोधंकुरुतेसोमपुत्रनमोनमः ३ होमंघृततिलैःकुर्याद्बुधनाम्नाचमंत्रवित् स
मिधाष्टोत्तरशतमष्टाविंशतिरेववा ४ होतव्यामधुसर्पिर्भ्यांदध्नाचैवघृतेनवा बुधशांतिरियंप्रोक्ताबुधवेकृतनाशिनी
५ बुधदोषस्तुकर्तव्यातथाशांतिकपौष्टिकं ६ अथगुरोशांतिः गुरुंचैवानुराधास्तुपूजयेद्भक्तितोनरः पूर्वोक्तविधिना
योगेसमन्नक्तान्यथाचरेत् १ हेमंहेममयेपात्रेस्थापयित्वाबृहस्पतिं पीतांबरयुतच्छन्नंपीतयज्ञोपवीतिनं २ पादुकोपा
नहच्छत्रकमंडलुविभूषितं पूजयेत् पीतकुसुमैःकुंकुमेनविलेपनं ३ धूपदीपादिभिर्दिव्यैःफलैश्चंदनतंडुलैः एवं
डलाद्योपहारैस्तुगुरोरग्रेनिवेदयेत् ४ धर्मशास्त्रार्थतत्त्वज्ञज्ञानवैराग्यपारग विबुधार्तिहराचिंत्यदेवाचार्यनमोस्तु

प्रा॰म॰

२४

34

ते ५ होमंघृततिलैः कुर्याद्गुरुनाम्नाचमंत्रवित् सविधाष्टोत्तरशतमष्टाविंशतिरेवच ६ होतव्यामधुसर्पिर्भ्यांदध्नाचै

वघृतेनच समिधाश्चत्रअश्वत्थ एतद्धतंमहापुण्यंसर्वपापहरंशुभं ७ तुष्टिपुष्टिकरंन्टणांगुरुवैकृतनाशनं विषमस्था

स्थेगुरौकार्यामहाशांतिरियंन्टभिः ८ अथगुरुपूजा स्कांदे कन्याविवाहिताकालेशुद्धिर्यस्यानविद्यते ब्राह्मणस्यो

पनयनेयस्यस्याद्दुःस्थितागतः १ दुःस्थितिंप्राप्तः एभिःपूजागुरोःकार्याविधिवद्भक्तिभावितैः मदयंतीकामपुष्पाणिपा

त्रेपालाशसर्षपा २ मदंतिपृथ्वकाकामोमदनजिह्वाग्रहवनाश्वः गडूचीवानपामार्गविडंगशंखिनीवचा वाचाकर्ची

रमुस्तोचसर्वौषध्यःप्रकीर्तिताः ३ तथैवसर्वस्यशृंगाचपंचगव्यंजलंतथा नूतनंसोदकुंभंचपीतवस्त्रसमन्वितं ४ पंचर

त्नैःसमायुक्तंईशान्यांस्थापयेत्कलान् याॐयधीरितिमंत्रेणसर्वास्वस्मिन्विनिक्षिपेत् ५ कुंभस्योपरिभागेतुस्थापयित्वा

बृहस्पति स्वर्णपात्रेसौवर्णीप्रतिमांतुयुधिष्ठिर ६ कारयेत्तुयथाशक्त्यावित्तशाठ्यविवर्जितः पीतवस्त्रयुगच्छन्नांपीत

यज्ञोपवीतिनीं ७ पूजयेद्गंधपुष्पाद्यैस्ततोहोमंसमाचरेत् समिधोऽश्वत्थवृक्षस्यहोतव्याष्टोत्तरंशतं ८ तिलव्रीहियवोस्मि

श्रंहोतव्यंचयथाक्रमं बृहस्पतेतिमंत्रेणऋषिछंदसमन्वितः ९ मंत्रेणानेनजुहुयाद्वाज्यपूर्वंचयत्नतः ततोहोमावसाने २४

तुपूजयेच्चबृहस्पतिं १० पीतगंधैस्तथापुष्पैर्धूपैर्दीपैश्चशक्तितः दध्योदनंचनैवेद्यंफलतांबूलसंयुतं ११ मंत्रेणानेनकौं

तेयसमभ्यर्च्यपुनःपुनः नमस्तेंगिरसांनाथवाक्पतेचबृहस्पते १२ क्रूरग्रहैःपीडितानांअस्मतायनमोनमः पूजयित्वागुरा

चार्यपश्चादर्घ्यंनिवेदयेत् १३ गभीरदृढरूपांगदेवेज्यसमतेप्रभो नमस्तेवाक्पतेशांतग्रहाणार्घ्यंनमोस्तुते १४ अर्घ्यमंत्रः २४

अर्घ्यंदद्यात्ततःसम्यग्जपहोमसमापयेत् भक्त्यायतेसराचार्यहोमपूजादिसत्कृतं १५ तत्वंगृहाणशांत्यर्थंबृहस्पतेनमो २५

नमः संकल्पमंत्रः मंत्रेणानेन संकल्प पश्चात्संप्रार्थयेन्नृप १६ जीवो बृहस्पतिः सूरिराचार्यो गुरुरंगिराः वाचस्पतिर्देव
मंत्री शुभं कुर्यात्सदा मम १७ प्रार्थनामंत्रः एवं संप्रार्थयेद्देवं आचार्यं च प्रपूजयेत् सर्वोपचारैः संयुक्तां प्रतिमां तां युधिष्ठिर १८
प्रणम्य च गवा युक्तामाचार्याय निवेदयेत् अथाचार्यस्तु नियतो वेदवेदांगपारगः १९ यजमानं सपत्नीकं शांतचित्तं जितेंद्रि
यं कुंभोदकैः गृहीत्वा तु मंत्रैरेतैः प्रसिंचयेत् २० इदमापोयमंत्रेणमग्निवर्णामृचानया याओषधीरश्वावतीः कूष्मांडैश्चा
भिषेचयेत् २१ पश्चात्संभोजयेद्विप्रान् यथाशक्त्या युधिष्ठिर एवं कृत्वा गुरोः पूजां सर्वान्कामानवाप्नुयात् २२ संक्रांतावपि
कौंतेय तथास्ताभ्युदयेषु च कुर्वीत बृहस्पतेः पूजां अभीष्टफलमाप्नुयात् २३ संक्रांतौ गुरुसंक्रांतौ इति गुरुपूजा अथ
शुक्रशांतिः भविष्ये शुक्रं ज्येष्ठास्तसंगृह्य त्नमायांतक्रमभोजनं तमाभुः गुरुं त्र्यक्षमात्रेण द्विजसंतर्पणेन च १ सम्यमेत्व
थ संप्राप्ते रौप्यशुक्रं तु कारयेत् वंशपात्रे च संस्थाप्य पूजयेत्सितपंकजैः २ तदभावे सितैः पुष्पैः तांबूलैश्चंदनेन च अनेन
स्यप्रदानं च पायसं घृतसंस्कृतं ३ दद्यादनेन मंत्रेण ब्राह्मणाय कुटुंबिने भार्गवो भर्गशुक्रश्च शुचिः श्रुतिविशारदः ४
हित्वा ग्रहकृतान् दोषान् आयुरारोग्यदोस्तु सः होमं घृततिलैः कुर्याच्छुक्रमात्राच मंत्रवित् ५ समिधाष्टोत्तरशतम
ष्टाविंशतिरेव वा होतव्यामधुसर्पिभ्यां दध्ना चैव घृतेन च ६ अथ प्रतिशुक्रादिशांतिः तत्रैव मात्स्ये अथातः शृणु भूपा
ल प्रतिशुक्रस्य शांतये यात्रारंभे विवाहे च तथा शुक्रोदये सति १ शुक्रपूजाप्रकर्तव्या तानिशामय भारत राजतं वाथ सौव
र्णिकं श्पपात्रेथवा पुनः २ शुक्रं पुष्पांबरयुते श्वेततंदुलपूरिते निधाय राजतं शुक्रं सविमुक्ताकलान्वितं ३ महाश्वेतसमा
युक्तं सामगाय निवेदयेत् नमस्ते सर्वलोकेश नमस्ते भृगुनंदन ४ कवे सर्वार्थसिध्यर्थं गृहाणार्घ्यं नमोस्तु ते दत्वा तम

ग्रां·म·
३५
35

ॐकौंतेयप्रणिपत्यसमर्चयेत् ५ एवं शुक्रोदये कुर्याद्यात्रादिषु च भारत नष्टहा वाचस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर ६ सौ
वर्णपात्रे सौवर्णमये शुद्धे रोहितं पीतपुष्पांबरधरं कृत्वा स्नात्वाथ सर्षपैः ७ पालाशाश्वत्थभंगेन पंचगव्ये तिलेन तु भ
र्गपल्लवः पीतांगरागवसनो हुतहोमं तु कारयेत् ८ ब्रह्मणस्पतां गवा सार्द्धं ब्राह्मणाय निवेदयेत् नमस्ते गिरिसां नाथ वा·
क्पतेने बृहस्पते ९ क्रूरग्रहैः पीडितानां अमृताय नमो नमः संक्रांतावपि कौंतेय यात्रास्वभ्युदयेषु च १० कुर्वीन् बृहस्पतेः पू
जां सर्वान् कामानवाप्नुयात् अथवा मौक्तिकान्येव सहतानि बृहस्पतिच भार्गवांगिरसौ चिंत्यतान्येव प्रतिपादयेत् १२ इति शु
क्रशांति अथ शनिराहुकेतूनां शांतयः भविष्ये शनैश्चरं राहुकेतुं लोहपात्रेषु निक्षिपेत् कृष्णागतः कृष्णागरुः स्नातोपू
पोदक्षिणाच स्वशक्तितः १ यथाक्रमं शमीदूर्वाकुशानां समिधः स्मृता सममेत्वथ संप्राप्ते नवर्णानथ कारयेत् २ कृष्णव·
स्त्रयुगच्छत्रमेकैकं कारयेद्बुधः मृगनाभ्या समालभ्य कृशरान्विनिवेद्य च ३ होमावसाने सर्वं च ब्राह्मणायोपपादयेत्
शनैश्चर नमस्तेस्तु नमस्ते राहवे तथा ४ केतवे च नमस्तुभ्यं सर्वशांतिप्रदायक एवं कृते भवेद्यत्तु तन्निबोध नृपोत्तम ५ य
दि भौमो रविसुतो भास्करो राहुणा सह केतुश्च मूर्तौ तिष्ठंति सर्वे पीडाकरा ग्रहाः ६ अनेन कृतमात्रेण सर्वे शाम्यंत्युपद्रवाः
इति पाप्मादि शांतिः भविष्योत्तरे यस्तु संवत्सरं यावत् मासे मासि दिने नरः तैलं ददाति विप्राणां स्वशक्त्याभ्यंजनेपि वा १ त·
तो मंदस्य दिवसे स्नानमभ्यंगपूर्वकं कार्यं देयमनुध्याय तैलमभ्यंगहेतवे २ ततः संवत्सरस्यांते प्राप्ते तस्य दिने पुनः लोहंक
टार्पितं सौरिं तैलकुंभे विनिक्षिपेत् ३ लोहे वाम्रमये वाथ कृष्णावस्त्रयुगान्वितं कृष्णगोदक्षिणायुक्तं कृष्णकंबलशायिनं ३५
४ स्वयमभ्यंगतः स्नात्वा कृष्णपुष्पैः समर्चयेत् सुगंधिगंधपुष्पैश्च कृशरान्वै तिलोदनैः ५ मंत्र पितास्य सूर्य पुत्रं नमस्येति पु

नः पुनः कृष्णाय द्विजमुख्याय नदभावेन राय च ६ देयः शनैश्चरो भक्त्या मंत्रेणानेन वै द्विज क्रूरावलोकनवशाद्व
नेनाप्नोति यो ग्रहहृष्टः तुष्टो धनकनकसर्वं ददाति सौम्यान् शनैश्चरः ७ पातु यः नष्टराज्याय नराय परितोषितः स्व
प्ने ददौ निजं राज्यं स मे सौरिः प्रसीदतु ८ कोणे नीलांजनप्रख्यं मंदचेष्टाप्रसारिणं छायामार्तंडसंभूतं नमस्यामि
शनैश्चरं ९ नमोर्कपुत्राय शनैश्चराय नीहारवर्णांजनमेचकाय श्रुत्वा रहस्यं भवकामदस्त्वं फलप्रदो मे भव सूर्य
पुत्रः १० नमोस्तु प्रेतराजाय कृष्णदेहाय वै नमः शनैश्चराय क्रूराय शुद्धबुद्धिप्रदाय च ११ य एभिर्नामभिः स्तौति त
स्य तुष्टिं ददात्यसौ तदीयं तु भयं तस्य स्वप्नेपि न भविष्यति १२ स्कांदे श्रावणे मासि संजाते शोभने शनिवासरे लोह
रूपं शनिं कृत्वा स्नाप्य पंचामृतेन वै १३ पुष्पैर्दृष्टिविधैर्धूपैः फलैश्चैव विशेषतः नामभिः पूजयेदेतैः क्रमेण ग्रहस
त्तमः १४ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः सौरिः शनैश्चरो मंदः पिप्पलादेन संस्तुतः १५ शावोदेवीति सर्व
त्र वैदिकेन च पूजयेत् पूजयित्वा तु नैवेद्यं ततः कुर्यात्क्रमेण तु १६ समाषभक्तं प्रथमे द्वितीये पायसं शुभं तृतीये वलि
कार्या च चतुर्थे पूरिका शुभा १७ अंविलीनकृतंडुलपिष्टादिनिर्मितो लेख्यविशेषः इति शनिव्रते अथ शनिस्तोत्रं ततः कृ
तांजलिर्भूत्वा स्तौति चक्रे स बालकः पिप्पलादो द्विजश्रेष्ठः प्रणिपत्य मुहुर्मुहुः १ नमस्ते कोणसंस्थाय पिंगलाय नमो
स्तु ते नमस्ते बभ्रुरूपाय कृष्णाय च नमोस्तु ते २ प्रसादं कुरु मे देव दीनस्य प्रणतस्य च शनैश्चर उवाच परितुष्टोस्मि ते
वत्स स्तोत्रेणानेन सांप्रतं वरं वरय भो वत्स येन यत्कामिवांछितं ३ पिप्पलाद उवाच अद्यप्रभृति नो पीडां बालानां रविनंद
न त्वया कार्या महाभाग नस्वकीया कथंचन ४ यावत्षष्टिकं जातं मम वाक्येन सर्वजः स्तोत्रेणानेन यो न्यस्त्वा क्रिया ।

ग्रां·मे·
३६
36

त्वानरूपस्थित ५ तस्यपीडानकर्त्तव्यास्त्वयाभास्करनंदन तस्यपीडानकर्त्तव्यादेयोलाभोमहाभुजः अर्द्धाष्टमिकयायोगे
तावकेसंस्थितेनरः सार्द्धसप्तवर्षपर्यंतंद्वादशाजन्मद्वितीयराशिभिर्यशनीश्वरोयोगः सार्द्धाष्टकमिकयायोगउच्यते ८ त
ववारेतुसंप्राप्तेयस्तिलान्लोहसंयुतान् शक्त्याददातिनोतस्यपीडाकार्यात्वयाविभो ९ कृत्स्नांगंयस्तुविप्रायतवोद्देशेनय
च्छति अर्द्धाष्टमिकयापीडानस्यकार्यात्वयानच १० शमीसमिद्भिर्योहोमंतवोद्देशेननिर्वपेत् तथाकृत्स्नतिलैश्चैवकृत्स्न
पुष्पानुलेपनैः ११ पूजांकरोतियस्तुभ्यंधूपंवागुग्गुलंदहेत् कृत्स्नवस्त्रेणसंवेष्ट्यपात्र्यातस्यत्वयाव्यथा १२ सूतउवाच
एवमुक्त्वाःशनिस्तेनवाक्यमित्येवलभ्यच नारदंसमनुज्ञाप्याजगाममनिजसंश्रयं १३ इतिशनैश्चरशांतिः अथार्कविवाहः
प्रयोगरत्ने मात्स्ये तृतीयामानुषींचैवचतुर्थीयेसमुद्वहेत् पुत्रपौत्रादिसंपन्नः कुटुंबीसाग्निकोऽज्वरः १ उद्वहेत्प्रतिसिध्य
र्थंतृतीयांनकदाचन मोहादज्ञानतोवापियदिगच्छेत्तुमानुषी नश्यत्येवनसंदेहोगार्ग्यस्यवचनंयथेति ३ तत्रैवसंग्रहे
तृतीयांयदिचोद्वाहेतर्हिसाविधवाभवेत् चतुर्थ्यादिविवाहार्थंतृतीयेर्कंसमुद्वहेत् १ आदित्यदिवसेवापिहस्तेर्केवा·
शनैश्चरे शुभेदिनेहिपूर्वाह्णेकुर्यादर्कविवाहकं २ व्यासः स्नात्वालंकृतवासास्तुरक्तगंधादिभूषितः सपुष्पकलशाव
कमर्कगुल्मंसमाश्रयेत् ३ सलक्षणेमसंयुक्तं अर्कसंस्थाप्ययत्नतः अर्ककन्याप्रदानार्थमाचार्यंकल्पयेत्सुरा ४ अर्कस
न्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् नांदीश्राद्धंहिरण्येनअष्टवर्णान्प्रपूजयेत् ५ पूजयेन्मधुपर्केणवरंविप्रस्यहस्ततः
यज्ञोपवीतवस्त्रंतुहस्तकर्णादिभूषणं ६ उष्णीषगंधमाल्यादिवरायास्मैप्रदापयेत् स्वशाखोक्तप्रकारेणमधुपर्कंसमा
चरेत् ७ ब्राह्मेयामात्प्राच्यामुदीच्यांवाशुपुष्पफलशंयुतं परीस्यपत्नतोयस्तात्स्थंडिलादियथाक्रमः ८ विधिःकुर्या ३६

दितिशेषः कृत्वार्कपुरतस्तिष्ठन् प्रार्थयेत्तु द्विजोत्तम त्रिलोकवासी सप्ताश्वछायया सहितो रवे ९ तृतीयोद्वाहजं दोषं
निवारय सुखं कुरु तत्राध्यारोप्य देवेशं छायया सहितं रविं १० वस्त्रैर्माल्यैस्तथा गंधैस्तु मंत्रेणैव प्रपूजयेत् तत्रैव श्वेतवस्त्रे
ण तथा कार्पासतंतुभिः ११ गंधपुष्पैः समभ्यर्च्य तल्लिंगैरभिषिच्य वा गुडौदनं तु नैवेद्यं तांबूलं च समर्पयेत् १२ आसः अ
र्कं प्रदक्षिणीकुर्वन् जपेन्मंत्रमिमं बुधः मम प्रीतिकरा येयं मया सृष्टा पुरातनी १३ अर्कजा ब्राह्मणा सृष्टा अस्माकं प्रतिरक्ष
येत् पुनः प्रदक्षिणीकुर्यान्मंत्रेणानेन मंत्रवित् १४ नमस्ते मंगले देवि नमः सवितुरात्मजे त्राहि मां कृपया देवि पत्नी त्वं मे
इहागता १५ अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च वृक्षाणामादिभूतस्त्वं देवानां प्रीतिवर्द्धनः १६ तृतीयोद्वाहजं पा
पं त्वं चाशु विनाशय ततश्च कन्यावरणे त्रिपुरुषं कुलमाचरेत् १७ आदित्यः सविता चार्कः पुत्री पौत्री च नप्त्रीका गोत्रं का
श्यपमित्युक्तं लोके लौकिकमाचरेत् १८ सुमुहूर्ते निरीक्ष्यैव तु स्वस्तिसूक्तमुदीरयन् आशीर्भिः सहितः कुर्यादाचार्यप्रमुखैर्द्वि
जैः १९ अथाचार्यं समाहूय विधिना तन्मुखाह्वनं परिगृह्य ततो होमं गृह्योक्तविधिनाचरेत् २० आसः अर्ककन्यामिमां विप्र य
थाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्तां विभ्रासमाश्रये २१ अंजलस्पतकर्माणि कृत्वा कंकणपूर्वकं यावत्पंचावृतीः सूत्रे
तावदर्कं प्रवेष्टयेत् २२ स्वस्वशाखोक्तमंत्रेण गायत्र्या वाथवा जपेत् पंचीकृत्य पुनः सूत्रं स्कंधे वध्नाति मंत्रतः २३ बृहत्सामे
तिमंत्रेण सूत्ररतां प्रकल्पयेत् अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरतस्तथा २४ कुंभांश्च निक्षिपेत् पश्चादाग्नेयादि चतुष्टये सव
स्त्रं प्रतिकुंभं च त्रिसूत्रेणैव वेष्टयेत् २५ हरिद्रागंधसंयुक्तं पूरयेच्छीतलं जलं प्रतिकुंभं महाविष्णुं संपूज्य परमेश्वरं २६ पाद्या
र्घ्यादिनैवेद्यांतं कुर्यान्नाम्नैव मंत्रवित् अथ शौनकोक्तहोमप्रकारः तृतीये स्त्रीविवाहेति संप्राप्ते पुरुषस्य तु आर्के विवाहं च

स्वामिशौनकोहंविधानतः १ अर्कसन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् नांदीश्राद्धंप्रकुर्वीतस्थंडिलंचप्रकल्पयेत् २ अ।
ग्रं·मं· (सन्निधिमागत्यतत्रस्वस्त्यादिवाचयेत् नांदी) अर्कमभ्यर्च्यसौर्यायगंधपुष्पाक्षतादिभिः सौर्यायसूर्यदैवत्ययाऋचाआ
३१ कृष्णेनत्यनया ३ स्वयंवालंकृतंतद्वद्वस्त्रमालादिभिःशुभैः अर्कस्योत्तरदेशेतुसमन्वारब्धएतया ४ एतयार्ककन्यया उ
द्वाहवनादिकंकुर्यादाघारांतमतःपरं आज्याहुतिश्चजुहुयात्स्वगोभिरमयैकया ५ कस्त्वेत्याकाममकामायस्वेतपंचमतः
37 परं त्वत्ताभिश्वसमस्ताभिस्तन्स्विष्टकृद्भवेत् ६ परिषेचनपर्यंतमपास्त्रेस्यादिकंक्रमात् प्रार्थनादिमंत्रादिविशेष
माह व्यासः पुनःप्रदक्षिणंकृत्वामंत्रमेतमुदीरयेत् मयाकृतमिदंकर्मस्थावरेषुजरायुना अर्कापत्यानिभोदेहितत्सर्वंक्ष
न्तुमर्हसि ८ इत्युक्त्वाशांतिसूक्तानिजप्त्वातंविसृजेत्पुनः गोयुग्मंदक्षिणांदद्यादाचार्यायचभक्तितः ९ इतरेभ्यश्चविप्रे
भ्योदक्षिणांचापिशक्तितः ततःसर्वेगुरवेदद्यादंतेपुण्याहमाचरेत् १० अथप्रयोगः तृतीयविवाहात्प्राक् दिनचतुष्टयाधि
कव्यवहितेतेरेविवाहेशानिवारेहस्तनक्षत्रेशुभेदिनांतरेवायथामाध्याह्नमदीनांवाहपुष्पफलयुतार्कोदयस्तात्स्थंडिलंकृत्वार्क
पश्चिमतउपविश्यमासपक्षाद्युल्लिख्यममतृतीयमानुषीविवाहजदोषापनुत्यर्थं अर्कविवाहंकरिष्ये इतिसंकल्प्यगणेश
पूजास्वस्तिवाचनमातृपूजननांदीश्राद्धाचार्यवरणानिकुर्यात् नत्रवृद्धिश्राद्धंहेम्ना आचार्येणपूजितोवरः त्रिलोका
वासिन् सप्ताश्वछायायासहितोरवे तृतीयोद्वाहजंदोषंनिवारयसुखंकुरुइतिस्वर्कसंप्रार्थ्यार्कमाकृष्णेनेतिछायासहितंरवि
मावाह्यस्वेनवस्त्रसूत्रैभ्यामावेष्ट्यसंपूज्यापोहिष्ठेत्यादिभिरभिषिंचगुडोदनंतांबूलादिसमर्प्यप्रदक्षिणीकुर्वन् ममप्रीति ३१
करायेयंमयासृष्टापुरातनी अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षत्विति पठेत् द्वितीयप्रदक्षिणायांतु नमस्तेमंगलेदे

विनमः सवितरात्मजे त्राहि मां कृपया देवि पत्नीत्वं मे इहागता १ अर्कत्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च वृक्षाणा
मादिभूतस्त्वं देवानां प्रीतिवर्धनः २ तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति ततः आचार्येणामासपत्ताद्युज्झिरमकाले
प्रपगोत्रा ३ मादित्यस्य पुत्रीं सवितुः पौत्रीं अर्कस्य प्रपौत्रीं इमां अर्ककन्यामिमां क्रेवरः स्वस्तिनइंद्रोवृद्धश्रवा इति सूक्तं प
ठन्नर्कं निरीक्षते ततः आचार्यो विप्रैः सहाशिषो दत्वामुकगोत्रायामुकगोत्रायामुकशर्मणे संप्रददे इत्यर्ककन्यां दत्वार्ककन्या
मिमां विप्राय यथाशक्ति विभूषितां गोत्राय शर्मणे तुभ्यं दत्वा विप्रसमाश्रयेति पठेत् वरस्तु यज्ञोपेकामः समृद्धतामिति प्र
थमा धर्मी मे इति द्वितीय शोम इति तृतीयामिति त्रीन् ततो जनीनर्कोपरि क्षिप्त्वा गायत्र्या परित्वेत्यादिना वा पंचाहुतीः सूत्रे
णार्कमावेष्टितस्तत्सूत्रं पुनः पंचगुणं कृत्वार्कस्य स्कंधे वध्वा वृत्तामतत्र भूहृदृढलम्नां त्रिष्टुभोजः शुभितमुग्रवीरं इन्द्रलोमे
न मथ्य मिदं वातेन सगरेण मम एति रक्तांपरिकल्प्यार्कस्य दिग्गिदित्वष्टौ कुंभान संस्थाप्य वस्त्रेणा त्रिः सूत्रेणावेष्ट्य हरिद्रा
गंधेनः तिष्ठान्तेषु नाम्ना विष्णुमावाह्य षोडशोपचारैः संपूज्य स्थंडिलेग्निं प्रतिष्ठाप्य आघारावाज्येनेत्येनमुत्क्रात्र प्रधा
नं बृहस्पतिमग्निं वायुं सूर्यं प्रजापतिं वाज्येन शेषेनेत्यादि सुत्क्वा चारांते संगोभिरंगिरा बृहस्पतिस्त्रिष्टुप् अर्कविवाहहो
मे विनियोगः अंसंगोभिरंगिरसो नक्षमाणो भग इवेदर्यमणं निनाय जने मित्रो न दंपति अनक्ति बृहस्पते वाजयाशूंरि
वाजौ स्वाहा बृहस्पतय इदं न मम इति त्यजेत् यस्मैत्वा वामदेवोग्निस्त्रिष्टुप् विनियोगः प्राग्वत् ॐ यस्मैत्वं कामकामाय व
यं सम्राड्यजामहे त्वमस्मभ्यं कामं दत्वाय थेदं घृतं पिव स्वाहाग्नय इदं ततो व्यस्तसमस्तव्याहृतिभिर्हुत्वा स्विष्टकृदादि १
—र्मशेषं समाप्यार्कं प्रदक्षिणीकृत्य मयाकृतमिदं कर्म स्थावरेषु जरायुनी अर्कापत्यानि नो देहि तत्सर्वं क्षंतु महेसी ।

तिशार्थ्याचार्यायगोयुग्ममव्येभ्यश्वविप्रेभ्योयथाशक्तिदक्षिणांदत्वाशांतिसूक्तंजपित्वाश्रेजोपकरणान्याचार्यायद॰
त्वादिनचतुष्टयमग्निंकुंभांश्चरक्षयेत् कुंभेषुमहाविलंपूजयेच्च पंचमदिनकृत्यंशास्त्रेचतुर्थेदिवसेऽतीतेश्र्वंवर्तांप्रपू॰
ज्यचहोममग्निंचविधिनामानुषीपरा उद्वहेदन्यथावैधव्यपुत्रपौत्रसमृद्धिमान् १ इतिश्रीभट्टनीलकंठकृतेभास्करेशांति॰
मयूखेऽर्कविवाहः अथरजोदर्शनशांति नारदः कुलीरवृत्तभचापांत्यन्त्युग्मकन्यातुलघटाराशयः शुभदास्त्रियानां
रीणांप्रथमार्तवे कुलीरःकर्कटःचापधनुःअंत्योमीनःन्त्युग्मिथुनं घटःकुंभःस्मृतिचंद्रिकायां शुक्लपक्षेसुशीला
स्यात्कृष्णेसाकुलटाभवेत् कृष्णपक्षदशमीयावन्मध्यमफलमादिशेत् तथैव अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्व
पि परिघस्यचपूर्वार्द्धेव्यतीपातेचवैधृतौ १ संध्यासूपप्लवेविष्टामशुभंप्रथमार्तवं रोगीपतिव्रतादुःखीपुत्रिणीभोगि
णीतथा २ पतिव्रताक्लेशयुक्तासूर्यवारादिषुक्रमात् कश्यपस्तु अष्टमीषष्ठमारिक्ताद्वादशीसंक्रमेपिवा वैधृतौच॰
व्यतीपातेग्रहणेचंद्रसूर्ययोः विष्टौसंध्यास्वनिद्रायांदुर्भगाप्रथमार्तवे ४ नक्षत्रफलमाहगर्गः सुभगाचैवदुःशीलावंध्या
पुत्रसमन्विता धर्मयुक्ताव्रतस्त्रीचपरसंतानमोदिनी १ सपुत्राचैवदुष्पुत्रापितृवेश्मरतासदा दीनाप्रजावतीचैवपुत्रा
याचित्रकारिणी २ साध्वीपतिव्रतानित्यासुपुत्राकष्टचारिणी स्वकर्मनिरताहिंस्रापुण्यापौत्रादिसंयुता ३ नित्यंधनक॰
यासक्तापुत्रधान्यसमन्विता मूर्खाथागुणवतीदस्रर्क्षादेःक्रमात्फलं ४ स्मृतिरत्ने शुभंचैवतुपूर्वाह्णेमध्याह्नेमध्य
मंफलं अपराह्णेचवैधव्यंपूर्वरात्रेशुभंभवेत् ५ मध्यरात्रेतुमध्यंस्यात्पररात्रेशुभान्वितं कश्यपः मलिनाम्बरवारेतुरात्रा
वपितथैवचेति ६ स्मृत्यंतरे मध्याह्नेतुभवेत् वंध्यानिशीथेविधवाभवेत् तथा अमासंक्रांतिविष्टौचव्यतीपातेचवै॰ ३८

ष्टौ परिचस्यात्पर्वाह्नेघटगंडातिगंडयोः ७ व्याघातेनवसूलेत्तनाडयः पंचतुर्दर्शने वैधव्यमर्थहानिंचसततनाशम
हर्नयं ८ वैधव्यमप्यवृद्धिंचेदारिम्रंतीणजीवनं तेजोहानिंसमाप्नोतिसदायुष्यवतीक्रमात् ९ स्थलभेदेफलभेदमा
हवसिष्ठः यामाद्बहिःपरग्रामेवाचेत्स्याद्व्यभिचारिणी पतिव्रतापतिस्थानेस्वशीलायहमध्यके १० ग्राममध्येतुद्वा
हिस्थः विधवाचदिगंबरा परागारेचदुःशीला आयुष्यंजलसंनिधौ ११ वनमध्येतुकल्याणधनधान्यसमृद्धिदा प
रागारश्मशानेनैवपितृमातृगृहनिषिद्धं १२ तथाचवसिष्ठाचारः विशेषनिषेधस्तुनदृश्यते तथा चंद्रेसद्गुणसंयुक्ते
देवगतममलाद्धुभं प्रावाधौचेपिअशुभमितिगरव वस्त्रफलमाहवसिष्ठ शुभगाश्वेतवस्त्रास्यात् दृढवस्त्रापतिव्रता
क्षौमवस्त्रातितीर्थास्यान्नववस्त्राशुभान्विता १ दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवाससा नीलांवरधरानारीविधवाप्र
श्चितापदि मलिनांवरतोनारीहरिद्रासाद्गजस्वला २ रजोविंदुफलमाहसएव वस्त्रेसुविषमारक्तविंदवपुत्रमाप्नुया
त् ३ समाश्चेत्कन्यकाचेतिफलंस्यात्प्रथमार्तवे देवगतः संमार्जनीकाष्ठतृणाग्निशूर्पान् हस्तेदधानाकुलटातदा
स्यात् तल्योपभोगेतपसिस्थिताचेदृष्टंरजोभाग्यवतीतदास्यात् ५ नारदः तिथ्यर्क्षवारादिविघस्रेतुशोधकर्माणिवारये
न त् दोषाधिकेगुणाल्पत्वेननथापिकारयेत् ६ दोषाल्पत्वेगुणाधिकेशोधकर्मसमाचरेत् निंद्यर्क्षतिथिवारेषुयदिपुष्पं
प्रदृश्यते ७ तत्रशांतिंप्रकुर्वीतघृतदूर्वातिलाक्षतैः प्रत्येकंशतमष्टोत्तरंगायत्र्याजुहुयात्ततः ८ स्वर्णगोभूतिलान्दद्यात्स
र्वदोषापनुत्तये भर्तातत्राभिगमनंवर्जयेत्स्वल्पदर्शनात् ९ वसिष्ठोपि प्रथमर्तौयदिदृश्यतेननपुष्पंततः शांतिकक
र्मकार्यं विसर्जयेद्देवतदेकशय्यांयावद्रजोदर्शनमन्यवेशे १० शौनकः आर्त्तवानांतुनारीणांशांतिंवक्ष्यामिशौनकः

शां॰म॰

३९

तिथिवारर्क्षयोगेभ्योलग्नेचमनवांशके ११ ग्रहेभ्योदुःस्थितेभ्यश्चतत्तद्दोषस्तथावचा अत्रपुत्रस्यलाभायदंपत्योरभिवृ
द्धये १२ पंचमेन्हिचतुर्थेवाग्रहपक्षप्रशस्तकं तस्मिन्नहनिकर्तव्यमेतत्तुहोमविधानतः आचार्यंवरयेत्प्रातःभुवनेश्वरितुष्टये॰
होमार्थंचजपार्थंचधारयेदृत्विजोबहून् १४ यजमानोद्विजैःसार्धंशांतिहोमंसमाचरेत् गृहादीशानदिग्भागेदेवतापूजना
यच १५ द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् कुंभत्रयंन्यसेत्तत्रशोभनंवस्त्रादिवेष्टितं १६ पूरयेत्तीर्थसलिलैःप्रतिकुंभंन्यसे
द्द्यान्यंऔषधानिचहैमंचप्रतिकुंभंपृथक्पृथक् १७ सूक्तेनायनवर्चान्प्रस्तवेवापइसय ऋचायाःप्रवतस्तइन्द्रायआवत॰
नःक्रमात् १८ कुंभमध्येन्यसेद्धान्यंऔषधानिचहैमंच ततश्चपंचरत्नानिगंधपुष्पाक्षतापुतान् १९ औषधानिचवक्ष्यंतिमुनिभिः
शांतिकारणात् औदुंबरंकुशादूर्वाराजीवंपंचविल्वकाः २० विलक्रांताचतुलसीवर्हिषंशंखपुष्पिका शतावर्यश्वगंधाचनि
र्गुंडीसर्षपद्वयं २१ अपामार्गपलाशश्चपनसोजीवकस्तथा प्रियंगवाश्चगोधूमाव्रीहयोमाषकच्छपवच २२ क्षीरंचदधिसर्पिश्च
पर्णंचैवतथोत्पलान् कुरंटकश्चगुंजाचवचाभद्रकमुस्तका २३ इतिद्वात्रिंशदौषधानीहगायत्र्यासर्वमाहरेत् गजाश्वरथ्या
वल्मीकसंगमाद्ध्यगोकुलात् २४ राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् कुंभस्थापनमित्याह ततन्मंत्रेणकारयेत्
२५ मृत्तिकाचौषधादीनिमंत्रेणप्रक्षिपेत्क्रमात् कुंभोपरिन्यसेत्पात्रंकांस्यंवाताम्रमेववा २६ मृण्मयंवेणुपात्रंवास्वस्व॰
वित्तानुसारतः पात्रोपरिन्यसेद्धैमंप्रतिमांभुवनेश्वरीं २७ तन्मूल्यांवान्यसेत्पात्रंइंद्राणीचपुरंदरं आचार्यःपूजयेद्देवीमंगा
द्यावरणानिच २८ अन्योवापूजनंकुर्यादाज्ञायआमंत्रसारया इंद्राणींपूजयेद्देवींइंद्राणीमासनादिभिः २९ क्रमेणपूजयेदिंद्रमिं
द्रवृषभवयं अनेनविधिनाचार्यपूजयेद्देवतात्रयं ३० आवाहनादिसकलैरुपचारैःपृथक्पृथक् तन्मध्यमंस्पृशन्कुंभंसं

३९

त्रेणभुवनेश्वरी ३१ जपेद्वाचार्यश्चाहोमाद्बीसूक्तंचजपेत्ततः स्पृशन्वेदस्त्रियांकुंभंश्चत्विग्येकोजपेदथ ३२ चत्वारिरुद्रा
सूक्तानिचतन्मंत्रोत्तराणिच संस्पृशन्वैदन्विसंनुजनंकुंभंश्रीरुद्रसंख्यया ३३ शान्तइंद्राग्निसूक्तंचनत्रचैवस्पृशञ्जपेत् ।
कुंभंश्चपश्चिमेदेशेशांतिहोमंसमाचरेत् ३४ अन्वाधानंततःकुर्याद्धोमतंत्रंसमारभेत् पूर्णपात्रनिधानांतंकृत्वाकार्यं
द्विजैःसह ३५ दूर्वाभिस्तिलगोधूमैः पायसेनघृतेनच पायसंश्रपयेत्तत्रसावित्रंचहविस्ततः ३६ कृत्वाज्यभा
गपर्यंतंहविरुद्दशनादिकं तिस्रभिश्चैवदूर्वाभिरेकैकाहुतिभिर्भवेत् ३७ आभिर्मंत्रप्रयुक्ताभिर्गायत्रीजुहुयात्क्रमात्
अष्टोत्तरसहस्रंतुशतमष्टोत्तरंतुवा ३८ तिलमिश्रश्चगोधूमैर्द्वयेनाज्याहुतीर्हुनेत् जुहुयात्पायसेनैवआज्येनचहुनेत्क्र
मात् ३९ हविश्चतुष्टयेनैवप्रत्येकंशतसंख्यया गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयं ४० ततःस्विष्टकृतंहुत्वारजुप्रहर·
णं तथा आयाश्चेत्यादिभिर्हुत्वासमुद्रादूर्मिसूक्ततः ४१ संततामाज्यधारांतांपूर्णाहुतिमथाचरेत् परिषेचनपर्यंतं·
होमशेषंसमापयेत् ४२ महौषधिस्थितैस्तत्रप्रतिकुंभस्थितोदकैः अन्नमस्याःस्त्रियःशांतिंदपतीमांसवायच ४३ अ
भिषेकमंत्राश्चप्रोक्तंतेशौनकादिभिः अंबकेणैवमंत्रेणजातवेदसपकया ४४ समुद्रज्येष्ठइत्यादिचतुर्भिश्चप्रसिद्धकैः
त्रायेतामितिमंत्रैश्चत्रिभिश्चाभिययाक्रमं ४५ इमाआपस्तेचैनैवदेवस्यत्वेतिमंत्रतः मंत्रेणाथतमीशानंत्वमग्नेरुद्रइत्यथ ४६
तमुष्टुहीतिमंत्रेणभुवनस्यपितस्तथा यातेरुद्रेतिमंत्रेणशिवसंकल्पमंत्रतः ४७ इंद्रत्वावृषभंवयंमंत्रैश्चाभिषेचये
त् साचवस्त्रांतरंधृत्वापुनश्चैवोपवासिनी ४८ उपवासोत्रसमीपावस्थानं विधानमर्चविधिवद्गंधपुष्पाक्षतादिभिः ४९
धेनुंपयस्विनींदद्यादाचार्यायचभूषणैः सदक्षिणमनड्वाहंप्रदद्याद्रुद्रजापिने ५० ऋत्विग्भ्यश्चापिसर्वेभ्योदद्याद्देदक्षिणां·

शां॰म॰ ततः महाशांतिं प्रजप्त्वाथ विप्राशीर्वचनं ततः ५१ ब्राह्मणान्भोजयेच्चैव भुंजीयात् स्वजनैः सह स्त्रीतो ब्राह्मणान्भो
जयित्वा तु देवज्ञं भोजयेत्ततः ५२ एवं यः कुरुते शांतिं शौनकोक्तप्रकारतः तदानिष्टं तु सफलं सर्वं चापि विनश्यतीति ५३
८० शौनकोक्तरजोदर्शनशांतिः अथ प्रयोगः कर्त्ता देशकालौ संस्मृत्वा मम पत्न्याः प्रथमरजोदर्शने अमुकदुष्टमासादिसूचि
तारिष्टनिरसनार्थं शांतिं करिष्य इति संकल्प्य गणेशपूजनस्वस्तिवाचनमातृकापूजनाभ्युदयिकाचार्यवरणानि कुर्या
40 त् अथाचार्यो गृहेशान्यां प्रत्येकं मंत्रावृत्त्या पदार्थानुसमयेन कुंभत्रयं स्थापयेत् तद्यथा मही द्यौरिति मध्ये तद्दक्षिणे
तरस्य स्पृष्ट्वा ओषधय इति स्पर्शः क्रमेणात्ते षु स्थानेषु द्रोणप्रमाणान् व्रीहीन् राशीकृत्य तेनैव क्रमेण राशित्रये आकलशे
ष्विति कुंभत्रयं संस्थाप्य मध्ये प्रस्तुत्वाप इति नवभ्रभिः तद्दक्षिणे या प्रवत इति तच्चात्तु तत्त्वे गायत्र्या जलं दत्वा त्रिषु पि
गंधद्वारामिति गंधं या ओषधीरिति सर्वौषधीः रोषधयः समिति यवान् दत्वा मध्यम एव यवव्रीहितिलमाषकंगुश्यामा
कमुद्गान् दत्वा दुंबरकुशदूर्वारक्तोत्पलचंपकबिल्वविष्णुक्रांतातुलसीवर्हिषशंखपुष्पीशतावर्यंगधानि गुंडीरक्तपी
तसर्षपापामार्गपलाशपनसजीवकप्रियंगुगोधूमव्रीसाग्धन्यदधिदुग्धघृतपद्मपत्रनीलोत्पलसितकुरंटकगुंजावचा
भद्रमुस्तकाख्यानि द्वात्रिंशदौषधानि यथासंभवं वा दत्वा त्रिषु दूर्वापंचपल्लवसप्तमृत्तिकाफलपंचरत्नसुवर्णानि दत्वा
युवासुवासा इति वाससा सूत्रेण कुंभकंठान् वेष्टयित्वा गंधादिभिरलंकृत्य पूर्वंएर्णादि विनिपवादि पूर्णपात्राणि निधाय तेषु सा
ष्टदलं श्वेतं वस्त्रं न्यस्य मध्ये गायत्र्या विश्वामित्रो भुवनेश्वरी गायत्री भुवनेश्वर्यावाहने विनियोगः तत्सवितुरिति भुवने
श्वरीं तद्दक्षिणकुंभे इंद्राणीं ह्वषाकपिरिंद्राणी पंक्तिः इंद्राण्यावाहने इंद्रवेती इंद्रप्रतिमासस्थाप्य षोडशभिः पंचभिर्वोपचा

रैरभ्यर्च्य मध्यमेष्टसहस्रमष्टशतं वा गायत्रीं ओ सक्तं च जपेत् ततएकत्वेकदक्षिणकुंभे रुद्रसूक्तानि जपेत् तानि च कद्रुद्रा
येत्येकादशर्चं इमा रुद्रायतवसेत्येकादशर्चं इमा रुद्राय स्थिरधन्वन इति ये च वर्चं आ ते पितरिति पंचदशर्चं तमुष्टुहीति
का भुवनस्पतिं पितर इत्येका अथ यामे विगतरक्तुंभे एकादश आहुतीः रुद्रसूक्तं शान्न इन्द्राग्नी इति पंचदशर्चं जपेत् कद्रुद्रायेति न
वर्चस्यचोरः कण्वो गायत्रीं जपे इमा रुद्राय तवस इत्येकादशर्चं स्याकुत्सा रुद्र आया नवजगत्योत्ये हे नुष्टुभो जपे आ वो सजा
तं वामदेवो रुद्रस्त्रिष्टुप् अथाचार्यः कुंभपश्चिमेग्निप्रणीयतदीशान्यां ग्रहस्थापनादिप्रजांतं कृत्वा तदीशान्यां एकं कुंभं स्था
प्य तत्र वरुणावाहनादि प्रजांतं कृत्वा वा दध्यात् तत्रास्मिन्नत्वाहितस्यां विष्फदि च वहूर्षी आज्येने मंत्र मुक्त्वा भुवनेश्वरी मिंद्रा
णीमिंद्रं च प्रत्येकममुकसंख्यायाहूर्वातिलगोधूमपायसाज्यैर्यहामुकसंख्यासमितिलाज्यैः शेषेणास्विष्टकृतमित्यादियद्वे
द्यंतमुक्त्वा परिस्तरणाद्याद्याराज्यभागांतं कृत्वा यजमानेनागप्रधानदेवता उद्दिश्यपताम्यनमम इति उक्ते ऋत्विग्भिः सहान्वा
धानक्रमेण जुहुयात् अन्यत गायत्र्येव तु होतव्यं हविरत्र चतुष्टयं ततः स्विष्टकृतं हुत्वेत्युक्ते तत्रेंद्राणींद्रयोर्होमानभिधानान
न योर्होमोन्वाधानेवाकीर्तनमित्याकुपरेतं भुवनेश्वरी तत्स्नेनसंख्यया होम इति नमुष्टिहि भोमे रुद्रस्त्रिष्टुप् भुवनस्यपितरे
ऋत्विंद्रस्त्रिष्टुप् त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप् जपविनियोगः ततः स्विष्टकृदादिवलिदानांतं कृत्वा समुद्रादूर्मिरिति तृचेन पूर्ण
हुतिं हुत्वा प्रणीताविमोकं कृत्वा ऋत्विग्भिः सहसभार्ययजमानं कुंभोदकैरभिषिंचेत् तत्र मंत्राः आपो हिष्ठेति नव ऋचः य
एकं रहिदयइति त्रिस्त्रिष्टुं देवेति ऋचः उभयं शृणवच्च न इत्येका स्वस्तिदा विशोपमित्येका त्र्यंबकमिति जातवेदस इति समुद्रज्ये
ष्ठा इति चतस्रः त्रायंतामिति २२ तिस्रः इमा आप इति २ ऋचः देवस्यत्वेति २ मंत्रैस्तनीशानं जगतः तमग्ने रुद्र इत्येकं यत्र ः।

ग्रा·मं· नमुष्टुहीतिभुवनस्यपितरंयानेरुद्रेतिजायग्रतइति ४ पतैःपात्रुषाः इंद्रात्वावृषभंवयमितिऋचःस्वरात्तामभिषिंचेतिइत्या
या १ पौराणाः एवमभिषिक्तः सस्नातोधृतशुक्लवासाः सपत्नीकोयजमानोग्निमाचार्यादींश्चसंपूज्याचार्यायधेनुंब्रह्मणेऽन्यति
४१ गभ्यश्चयथाशक्तिदक्षिणांरुद्रजापिनेसदक्षिणमङ्गाहंचभूयसींदत्वाग्रहपीठदेवतानांभवनेष्वाचार्यादीनांचोत्तरपूजांकृत्वायांतुदे
वगणा इतिविसृज्याचार्यायप्रतिपाद्यगच्छगच्छेत्यग्निंविसर्जयेत् ततोब्राह्मणाःशांतिंपठेयुः तत्रमंत्राः आनोभद्राइतिचस्वस्तिनो
41 मिमीतामिति १५ ऋचंतम्नृषिति ३ ऋचः तच्छंयोरितिच ततोयजमानोद्वादशब्राह्मणान्भोजयित्वासंकल्पयवाविप्राशिषो
गृहीत्वासुहृद्युतोभुंजीत अथचंद्रार्कोपरागकालीनाद्यरजोदर्शनेविशेषमाह कर्त्तोक्तकालेमासपक्षाद्युल्लिख्यममपत्न्याश्चं
द्रस्यसूर्यस्यवाउपरागेप्रथमरजोदर्शनसूचितारिष्टनिरासार्थंशांतिंकरिष्यइतिसंकल्प्यप्राग्वदृत्विक् पूजांतांकुर्यात् अथा
चार्योगोमयेनोपलिप्तेदेशेपंचवर्णैरष्टदलंकृत्वातत्रस्थेनवस्त्रमुदङ्मुखंप्रसार्य तत्राचंद्रोपरागेआप्यायस्वेतिराजत्याचंद्रसूर्यो
परागेतुआकृष्णेनेतिसौवर्ण्यंसूर्यंचप्रतिमायामावाह्यतदुत्तरतः स्वर्भानोरितिसैसंप्रतिमायांराहुमावाह्ययस्मिन्नक्षत्रेग्रहणं
तन्नक्षत्रदेवतांसौवर्णप्रतिमायांतत्तन्मंत्रैः प्रणवादिनमोंतैर्नाममंत्रैर्वावाह्यकांडानुसमयेनषोडशोपचारैःपूजयेत् तत्रचं
द्रायनक्षत्रदेवताभ्यश्चश्वेतानिगंधादीनिसूर्यायरक्तायराहवेकृष्णानिततःपश्चिमतोग्निंप्रतिष्ठाप्यपतेग्रहावाहनादिपूजांतं
कृत्वान्वादध्यात् तत्रचक्षुषीआज्येनेत्यंतमुक्त्वाचंद्रसूर्यंवाराहुंनक्षत्रदेवतांपतेग्रहांश्चामुकसंख्ययासमिदाज्यचरुतिलाहु
तिभिः शेषेणेत्यादिसमित्सुविशेषः चंद्रनक्षत्रदेवतयोःपालाशाः सूर्यस्यार्काः राहोर्दूर्वाचतिस्त्रएवाहुतयः अथाज्यभागांतेकृ
त्वायजमानेनद्रव्येत्यक्तेवाचानक्रमेणाग्निःसहहुत्वास्विष्टकृदादिपूर्णाहुत्यंतंप्राग्वत् कृत्वैकस्मिन्कुंभेजलपंचगव्यरत्नपंच ४१

त्वक् पल्लवसर्वौषधिकल्कदूर्वांकुशान्निक्षिप्य सार्त्विक् दंपती पूर्ववदभिषिंचेत् तत्रमंत्राः आपोहिष्ठेतितृचः इमंमेगंगेत्येका
तत्वायामीत्येका अन्येपिसमुद्रज्येष्ठाः सुरास्त्वामित्यादयश्चशेषंपूर्ववत् इतिदुष्टरजोदर्शनशांतिप्रयोगः अथगोमुखप्रस
वः गर्गः पित्रिष्टेसुतारिष्टेतथैवच प्रायश्चित्तंतदाकुर्यात् ततदोषस्यशांतये १ नाटशानन्तत्रोत्पन्नसूचितेपित्रायरिष्टेप्रा
यश्चित्तमित्यत्रापितत्तदित्यन्वेति देहलीदीपवत् तत्तदोषशांत्येतत्प्रायश्चित्तंकुर्यादित्यर्थः पुष्याश्विनोगुरौसर्पमघांत्यचि
त्रेंद्रमूलभे पञ्चस्वेतेषुजातस्यकुर्याद्गोजननंतथा १ जन्मर्क्षेवाद्विजन्मर्क्षेशुभेदिने कृत्वाभ्यंगादिकंसर्वंगृहालंकारपूर्वकं २
गोमयेनोपलिप्याथगृहस्येशानभागके पंकजंकर्णिकायुक्तंरजोभिःश्वेतवर्णकैः ३ व्रीहिस्तत्रविनिक्षिप्ययथावित्तानुसा
रतः नवसूर्पंततन्मध्येरक्तवर्णंप्रसारयेत् ४ स्थापयित्वाशिशुंतत्रपुनःसूत्रेणवेष्टयेत् प्राङ्मुखंतमवाक्पादंतिलगर्भग
तेशिशुं ५ गोमुखंदर्शयित्वातुपुनर्जातंतुगोमुखात् विसृज्योनिमितिसूक्तेनगव्येनस्नापयेच्छिशुं ६ गवामंगेषुतिष्ठंतिमंगेषु
संस्पृशेत् विसोःश्रेष्ठेणमंत्रेणगोप्रसूतंतुबालकं ७ आचार्यस्तुसमादायपश्चान्मात्रेददेत्तदा मातात्वक्षय्यभागस्थाशिशु
मानीयतन्मुखात् ८ ततःपित्रेतदादद्यात्ततोमात्रेप्रदापयेत् वस्त्रेस्थाप्यपितास्थाप्यपुत्रस्यमुखमीक्षयेत् ९ गोमूत्रंगोमयं
क्षीरंदधिसर्पिश्चसंयुतं आपोहिष्ठादिभिर्मंत्रैरभिषिंचेत्ततःशिशुं १० मूर्ध्निचाघ्रायतत्पुत्रंतन्मंत्रेणदापिता अंगादंगात्संभव
सिहृदयादधिजायसे ११ आत्मावैपुत्रनामासिसंजीवशरदःशतं मूर्धनित्रिरवघ्रायतंशिशुंस्थापयेत्ततः १२ पुण्याहंवाच
येत्पश्चाद्ब्राह्मणैर्वेदपारगैः दरिद्रायायविप्रायतांगामभ्यर्च्यदापयेत्ततः १३ गोवस्त्रसुवर्णधान्यादिदद्यादर्कादितःक्रमात् य
थाशक्तिधनंदद्याद्ब्राह्मणेभ्यस्तदापिता १४ ततोहोमंप्रकुर्वीतस्वस्वशाखोक्तमार्गतः उल्लेखनंततःकुर्यादाज्यभागांतमेव

च १५ होमस्येशानदिग्भागे धान्योपरि शुभं चरुं पंचगव्ये च घटे स्थाप्य तिलांस्तत्र विनिक्षिपेत् १६ क्षीरद्रुमकषायांश्च पंच
रत्नानि निक्षिपेत् वस्त्रयुग्मेन संस्थाप्य गंधादिभिरथार्चयेत् १७ विलंबरूणामभ्यर्च्य प्रतिमां च विधानतः प्रतिमां यत्नमणः
अग्रे तद्देवत्यहोमविधानात् चरुकोराद्व यत इंद्रादिभिर्मंत्रैः ॐ भस्यस्वामिमंत्रयेत् दधिमध्वाज्ययुक्तेन होमं कुर्याद्विधा
नत १९ आपोहिष्ठेति तिसृभिरक्षुमे सोमश्च्यश्च तद्विष्णोः परमं पदमक्षीभ्यां नेयसक्तनः २॰ ऋग्भिराभिः प्रत्येकं चा
ष्टाविंशतिसंख्यया अशक्तश्चाष्टसंख्यावा दधिमध्वाज्यसंयुतं दधिमध्वाज्येति पुनर्ग्रहणात् आदित्यादिग्रहेरन्वेति आदि
त्यादिग्रहाणां च होमं कुर्यात्समंत्रकं इति गोमुखप्रसवविधिः अथ प्रयोगः मासपक्षाद्युल्लिख्याथ शिशोरमुकर्क्षोत्पत्ति
सूचितारिष्टशांत्यर्थं गोमुखप्रसवं करिष्ये इत्युक्त्वा गणेशपूजनाचार्यवरणं कुर्यात् अथाचार्यो गोमयेनोपलिप्ते ईशान॰
दिग्भागे स्थिताष्टदलगतव्रीहिस्तम्भूर्ये रक्तवर्णवस्त्रं प्रसार्य तिलान् विकीर्य तत्र प्राङ्मुखं दक्षिणादिगतपादं संस्थाप्य सूत्रे
णावेष्ट्य गोमुखे संयोज्य मृत्वा त्वमशवं विचिंत्य विसृज्य योनिमिति सूक्तेन पंचगव्येन शिशुं संस्थाप्य गवामंगे स्थितिगां स्पृष्ट्वा
विष्णोः श्रेष्ठेनेति शिशुं गृहीत्वा मात्रे दद्यात् माता गोमुखप्रदेशाच्छिशुमानीय गोपुच्छदेशे स्थापित्रे दद्यात् पिता च मा च पु
नर्दत्वा भूमौ वस्त्रे संस्थाप्य तन्मुखं दृष्ट्वा पंचगव्येनापोहिष्ठेति त्र्युचेनाभिषिंच्य अंगादिति अंगादंगात्संभवसि हृदयादधिजा
यसे आत्मा वै पुत्रनामासि स जीव शरदः शतं त्रिभिर्मूर्ध्नि घ्राय पुण्याहं वाचयित्वा गामाचार्याय दत्त्वा ग्रहप्रीत्यर्थं गोवस्त्रस्वर्ण
धान्यानि दत्त्वा भूयसीं दक्षिणां दद्यात् अथाचार्योऽग्निं प्रतिष्ठाप्य चरुं श्री आज्येनेत्यंतेवरूणं आपोहिष्ठेति त्र्युचेन अक्षमश्च्युवा च
विष्णुतद्विष्णोरित्यृचा यत्नमहरणमक्षीभ्यामिति सूक्तेन प्रत्यर्चं ग्रहांश्च प्रत्येकमष्टाविंशत्यष्टान्यतमसंख्यया मध्वाज्यैः होमः

णस्विष्टकृतं मित्याद्युक्ताज्यभागांतं कृत्वाग्नेरीशान्यां कुंभस्य स्थाप्य तत्र पंचगव्य तिलश्री हिद्रीरद्रुमकषायान् दित्वा वस्त्रयुग्मे·
नावेष्ट्य पूर्णपात्रोपरि तद्धिरण्यरिति विस्रोस्तत्वायामि तिवरुणस्या द्वीभ्यामि ति यत्स्तहन अप्रतिमभ्यर्च्य यतइंद्रेतिषण्णांभर्गः प्रगा·
थ इंद्रोदेवता त प्रगाथच्छंदः जपे विनियोगः यत इंद्रो ति सकृद्वीजस्वान्वाधानक्रमेणहुत्वा कर्मशेषं समापयेदिति गोमुखप्रस
वप्रयोगः अथ सदंतोत्पत्तिशांतिः विष्णुधर्मोत्तरे उपरि प्रथमं यस्य यायंते च शिशोर्द्विजा दंता दंतैर्वसिहयस्या जन्म भार्गवसत्त
मः १ मातरं पितरं वापि खादेतात्मानमेव वा तत्र शांतिं प्रवक्ष्यामि तामेतिगदतः शृणु २ गजपृष्ठगतं बालं नौस्थं वा स्नपयेद्द्विज
तदभावे च वरासने ३ सर्वौषधैः सर्ववीजैः सर्वपुष्पैः फलैस्तथा पंचगव्येन रत्नैश्च स्रष्टनिकाभिश्च भार्गव ४ सर्वगंधानि सर्वौष
धानि विनायकस्नपनविधौ दर्शितानि स्थालीपाकेन धातारं पूजयेत्तदनंतरं सप्ताहं चात्र कर्तव्यं ततो ब्राह्मणभोजनं ५ अष्टमे·
ह्नि विप्राणां तथा देया च दक्षिणा कांचनं रजतं गाश्च भुवनागारमेव च ६ दंतजन्मनि सामान्ये स्नानमतः परं भद्रास
ने निवेश्यैनं मृत्स्निमूलैस्तथा ७ सर्वौषधैः सर्वगंधैः सर्ववीजैस्तथैव च स्नापयेत्पूजयेच्चात्र वन्हिसोमं समीरणं ८ पर्वतांश्च त
थाश्विनौ देवदेवं च केशवं एतेषामेव जुहुयात् घृतमग्नौ यथाविधि ९ ब्राह्मणानां तु दानं च यथाशक्त्या तु दक्षिणा ततः·
स्वलंकृतं बालमासने चोपवेशयेत् १० आसीनं सर्पशस्यान वीजैः स्नापयेत्ततः सुविप्रवालकानां च तेष्वकार्यं च पूजनं ११
पूजयेच्च विविधाचार्यो ब्राह्मणाः सुहृदस्तथा इति सदंतोत्पत्तिशांतिः अथ कृष्णचतुर्दशीजननशांतिः गर्गः कृष्णपक्षे चतुर्द
श्यां प्रसूते षड्विधं फलं चतुर्दशीं च षड्भागां कुर्यादाद्ये शुभं मतः १ द्वितीये पितरं हंति तृतीये मातरं सुतं चतुर्थे मातुलं हंति
पंचमे वंशनाशनं २ षष्ठे तु धनहानिः स्यादात्मनो वंशनाशनं तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विधानतः ३ आचार्यं वर·

येह्रीमान् पुत्रदारसमन्वितान् स्वकर्मनिरतं शांतं श्रोत्रियं वेदपारगं ४ सर्वालंकारसंयुक्तं सर्वलक्षणसंयुतं वृषभे च समा
सीनं वरदाभयपाणिनं ५ शुद्धस्फटिकसंकाशं श्वेतमाल्याम्बरान्वितं त्र्यंबकेन च मंत्रेण पूजां कुर्याद्विधानतः ६ स्थापयेच्चतु
रः कुंभान् चतुर्दिक्षु यथाक्रमं शुभपुण्यतीर्थजलोपेतान् धान्यस्योपरि विन्यसेत् ७ तन्मध्ये स्थापयेत्कुंभं शतछिद्रसमन्वितं
पंचमृत्पंचरत्नानि पंचत्वक् पंचपल्लवान् ८ पंचधान्यं सुवर्णं च तत्तन्मंत्रैर्विनिक्षिपेत् सर्वौषधानि निक्षिप्य श्वेतवस्त्रेणावे
ष्टयेत् ९ स्रग्भोगिणि च वस्त्राणि श्वेतानि परिवेष्टयेत् सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः १० आयांतु यजमानस्य दुरि
तक्षयकारकाः आवाहयेत् वरुणं मंत्रैरनेन विधिना ततः ११ इममेव वरुणोत्पन्नया तत्त्वायामि कृच्चानया त्वन्नो अग्ने त्वमग्ने यासत्व
न्नश्वेति मंत्रतः १२ आग्नेयकुंभमारभ्य पूजां कुर्याद्यथाक्रमं आनोभद्राः सूक्तं च भद्राग्ने सूक्तं ततः १३ जपस्तात्पौरुषं सूक्तं क
द्रुद्रं तत्क्रमाज्जपेत् ईश्वरस्याभिषेकं च ग्रहपूजां समाचरेत् १४ पूजाकर्मसु निर्वृत्ये होमं कुर्याद्विधानतः गृहादीशान दिग्भा
गे कुंडं कुर्याद्विधानतः १५ विस्तारायाम खातं च अरत्निद्वयसंमितं समिदाज्यचरूंश्चैव तिलमाषांश्च सर्षपैः १६ अश्वत्थप्लक्षपा
लाशसमिद्भिः खादिरैः शुभैः अष्टोत्तरसहस्रं वा अष्टोत्तरशतं तु वा १७ अष्टाविंशति मितैर्वा होमं कुर्यात्पृथक् पृथक् त्र्यंबके
नैव मंत्रेण तिलान् व्याहृतिभिः पृथक् १८ कृत्वा होमांश्च कर्तव्या अग्नेः समुद्भवे विधानतः एवं क्रमेण कर्तव्यं होमशेषं समापये
त् १९ सर्वालंकारयुक्तानां त्रयाणामभिषेचनं त्रयाणां मातापित्रोश्च सूनो चतुर्भिः कलशैरद्भिः शतकुंभसमन्वित २० धौतां
वराणि धृत्वा च कुर्यादाज्यावलोकनं पूर्णाहुतिं च हुत्वा यजमानः समाहितः २१ तत्सर्वं परया भक्त्या ईश्वराय निवेदयेत् स
र्वालंकारसंयुक्तां सवत्सां गां पयस्विनीं २२ प्रतिमां वस्त्रयुग्मं च आचार्याय निवेदयेत् अन्येषां चैव सर्वेषां कुर्याद्ब्राह्मणवाचनं ४३

तस्मादिनेनविधिनावित्तशाठ्यविवर्जितः एवंयःकुरुतेशांतिंसर्वपापैप्रमुच्यते २४ सर्वान्कामानवाप्नोतिस्थिरजीविसु।
खीभवेत् २५ इतिकृष्णचतुर्दशीशांतिः अथसिनीवालीकुहूशांतिः गार्ग्यः सिनीवाल्यांप्रसूतासायस्यभार्यापिशुर्वस्य
या गजाश्वामहिषाश्चैवशक्रस्यापिश्रियंहरेत् येसंतिसकलापश्वास्तत्प्रसादोपजीविन वर्जयेत्तानशेषांस्तुपशुपक्षिमृ
गादिकान् २ कुहूप्रसूतिरत्यर्थंसर्वदोषकरीस्मृता यस्यप्रसूतिरेतेषांतस्यायुर्धननाशनं ३ सर्वगंधसमस्त्वत्रदोषस्तु।
प्रबलोभवेत् शांतिंविनाविशेषेणपरित्यागोविधीयते ४ परित्यागान्तत्रशांतिंकुर्याद्विधानतः परित्यागादितिस्वल्पबलो
भवेत् एवंपंचमीपरित्यागंकृत्वेत्यर्थः तत्कालंतत्क्षणाज्जेनपुनरेवानुलेपनं नत्यजेत्पंडितोमोहाद्दर्पाद्वाज्ञानतोपिवा।
तद्योगात्सोतेनाशयेत् किंचित्स्वयंवानसमश्नुते कल्पोक्तशांतिःकर्त्तव्यासर्वदोषापनुत्तये ७ रुद्रःप्राक्तस्यपितरः पू
ज्यास्तुदैवताःक्रमात् कर्षमात्रसुवर्णेनतदर्धेनवापुनः ८ अथवाशक्तितःकुर्याद्वित्तशाठ्यविवर्जितः प्रतिमांकारये
त्कं भोश्चतुर्भुजसमन्विते ९ त्रिशूलखट्वांगवरदाभयहस्तायथाक्रमं श्वेतवर्णश्वेतपुष्पांश्वेतांबरधरांवृषस्थितां १० त्रि
यंबकेनमंत्रेणपूजांकुर्याद्यथाविधि इंद्रश्चतुर्भुजोवज्रांकुशचापःसमायकः ११ रक्तवर्णोगजारूढोयतइंद्रेतिमंत्रतः
पितरःकृष्णवर्णाश्चचतुर्हस्ताविमानगाः १२ गदादंडचक्रकमंडलुभयस्सैवधारिणः येसमानाइतिमंत्रेणपूजांकुर्यादनं
तरं १३ आग्नेयीदिशमारभ्यकुंभान्कोणेषुविन्यसेत् येसमानासोहविरदस्मादिमंत्रः ऋग्वेदेप्रसिद्धः तन्मध्येस्थापयेत्कुंभं
शातच्छिद्रसमन्वितं १४ निक्षिपेत्पंचगव्यादीस्तत्तन्मंत्रैश्चनिक्षिपेत् कल्पोक्तशांतिःकर्त्तव्याकुर्यात्क्षीवंस्वशक्तितः १५
गोदानंवस्त्रदानंचसुवर्णंचोवरांस्तुभा दशदानानिचोक्तानितीलमाज्यंगुडंतथा १६ आज्यवेक्षणपात्राणितत्तन्मंत्रैश्च

ग्रा॰म॰

४४

कारयेत् समिदाज्यंचरुहोमंचतिलहोमंचसर्षपैः १७ अश्वत्थप्लक्षपालाशसमिद्भिः खादिरैः शुभैः अष्टोत्तरशतंमुख्यंप्र
त्येकंजुहुयाद्विजः १८ त्र्यंबकेनमंत्रेणजुहुयात्स्नातृभिः पुनः चतुर्भिःकलशैर्युक्तंरुद्रकुंभसमन्वितं १९ शांतिवत्सक
लंकार्यमभिषेकंचकारयेत् शांतिवत्पूर्वोक्तशांतिवत् २० पितृमातृशिशूनांचअभिषिंचेद्द्विवारुणैः प्राकरस्याभिषेकंच
कपीठब्राह्मणभोजनं २१ अन्येषांचैवसर्वेषांब्राह्मणानांचतर्पणं यथाशक्त्यानुसारेणद्विजवाचनपूर्वकं २२ अथप्रयोगः
तत्रचतुर्दश्याः षोडशेषु द्वितीयत्रितीयषष्ठांशेषुजन्मचेत् गोप्रसवोपिकार्यः कर्तामासपक्षाद्युल्लिख्यास्यशिशोश्चतुर्दश्या
धर्मवर्गादिषुशिनीवाल्याकुहोवोत्पत्त्यासूचितसर्वानिष्टस्यनिरासार्थंशांतिंकरिष्यइतिसंकल्प्य गणेशपूजास्वस्तिवाचनमातृ
पूजावृद्धिश्राद्धाचार्यादिवरणानिकुर्यात् ततआचार्यः सर्षपविकिरणादिकृत्वापीठादौवरदाभयहस्तंवृषस्थंहैमींरुद्रप्रतिमां १५१
त्र्यंबकमंत्रेणसंपूजयेत् शिनीवालीकुह्वोरुद्रेंद्रपितरः तत्ररुद्रईशानोर्ध्वकरक्रमात्त्रिशूलखड्गवरदाभयहस्तोवृषस्थस्त्र्यंबक
मंत्रेण इंद्रोवज्रांकुशधरः शरकरकंविमानस्थापयेन्मत्वासइतिमंत्रेणपूजाइतिविशेषः ततः तत्प्राच्यामीशान्यामुदीच्यांवा
ग्नेयादिषुचतुरःकुंभान्मध्येचशतच्छिद्रंसंस्थाप्यतेषुपंचमृदः पंचरत्नपंचत्वकपंचपल्लवधान्यानिसर्वर्णसर्वौषधीश्चदि
स्वाम्येतवस्त्रपुष्पमालाभि गजस्यापतइंद्रेतिमंत्रेणपितरंकृष्णवर्णगदाहस्तंसूत्रकमंडलुभयकरांक रावेष्यसर्वेसमुद्राः
इत्यभिमृश्यइमंमेवरुणतत्वायामित्वन्नोअग्नेसत्वन्नइतिक्रमेणवरुणमावाह्यसंपूज्यक्रमेणानोभद्राभद्राअग्नेसहस्रशीर्षाक
कद्रुदायेतिसूक्तानिजपित्वायथाशक्तिरुद्राध्यायादिनाभिषिंच्यग्रहनावाह्यसंपूज्यगृहेईशान्यामग्निंसंस्थाप्यान्वादध्यात् त ४८
त्रचक्षुषीआज्येनेत्यंतेचतुर्दशीशांतौरुद्रमश्वत्थप्लक्षपालाशखदिरसमिद्भिराज्यचरुतिलमाषसर्षपैः प्रत्येकममुकसंख्य

यावन्तः समस्ता आहुतिभिस्तिलैश्चामुकसंख्यया यत्न इत्यादि सिनीवाल्यां कुह्वां च रुद्रं चरुं इंद्र पितरश्च प्रधानदेवतास्त्र्यंबकमं
त्रेण च शक्तितस्तिलहोमाधिक इति विशेषः ततः आज्यभागांते अन्वाधानोक्तक्रमेण होमः सिनीवालीकुह्वोः स्वर्णगोवस्त्रसु
वर्णभूमीराज्यगुडान् दत्वा गोभूतिलहिरण्याज्यवस्त्रधान्यगुडरूप्यलवणदानानि चरुदशक्त्या होमः कार्यः इति विशेषः
ततो बलिदानांते कलशोदकैः प्रातश्छिद्रा एणपाहे वत्सप मंत्रैरभिषिक्तः पत्नीशिष्यसहितो यजमानः आज्यमवेक्ष्य स्वर्णं दत्त्वा
तिं कृत्वा गुरवे धेनुं वासोयुगं मंत्रवित्यम्पश्च दक्षिणां च दत्वा स्वस्ति वाच्य कर्मेश्वरार्पणं कुर्यादिति क्रमात् चतुर्दशी सिनीवाली
कुहूशांतिप्रयोगः अथ दर्शजननशांतिः नारदः अथातो दर्शजातानां मातापित्रोर्दरिद्रता तद्दोषपरिहारार्थं शांतिं वक्ष्या
मि नारद १ पूर्णाह्वां वाच पित्रादिः कृतसंकल्पपूर्वकं कुंडं वा मंडलं कुर्यात् तद्देशे स्थापयेद्घटं २ मंडले स्थंडिले तत्कुंभे निक्षि
पेद्द्रव्यं दधिक्षीरचूतादिकं न्यग्रोधोदुंबराश्वत्थाः सचूताः स्नतकास्तथा ३ एतेषां तत्तमलानां त्वचादीपल्लवांस्तथा पंचर
त्नानि निक्षिप्य वस्त्रयुग्मेन वेष्टयेत् ४ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः आयांतु यजमानस्य दुरितक्षयकारकाः ५
आपो हिष्ठादृचो नाय कयानश्चित्र इत्यृच यत्किंचेदं मतानैव समुद्रज्येष्ठ इत्यृचा ६ अभिमंत्र्योदकं पश्चादग्नेः पूर्वप्रदेश
के हारिद्रं रक्तकं चैव कृष्णं श्वेतं च जीरकं ७ एतेषां तंदुलेश्वेव सर्वतोभद्रमुद्धरेत् दर्शस्य देवता प्रोक्ता सोमसूर्यस्वरूपकं
८ प्रतिमां स्वर्णजां नित्यं राजतीं ताम्रजां तथा सर्वतोभद्रमध्ये तु स्थापयेद्दर्शदेवता ९ रक्तवर्णं वस्त्रयुग्मं तद्वर्णं गंधपुष्पकं ॥
आप्यायस्वेति मंत्रेण सविता पश्चात्तथैव च १० उपचारैः समाराध्य ततो होमं समाचरेत् कृत्वा वह्निप्रतिष्ठां च कृतसंकल्पमीदृशं ११
आयुरारोग्यसिद्ध्यर्थं सर्वारिष्टप्रशांतये तेषां मायुः पुत्रस्य दोषजननदोषानिर्हरणाय च १२ मातापित्रोः कुमारस्य सर्वारिष्ट

शां·म·

५६

६५

45

प्रशांतयेतेषामायुःश्रियंचैवशांतिहोमंकरोम्यहं १३ समिधश्चचरुद्रव्यक्रमेणजुहुयात्कृती: हुनेत्सवित्रिमंत्रेणसोमोधे
नुंचमंत्रत: १४ एतैर्मंत्रैश्चप्रत्येकंहुनेदष्टोत्तरंशतं दर्शस्यदेवताहोमस्यअष्टाविंशतिसंख्ययासवित्रिमंत्रत्वाहूतस्येनेति ।
अत्रैतैरितिबहुवचनंदर्शदेवतामंत्राभिप्रायेण होममेवंतुकृत्वातुकुर्याद्धाराभिषेचनं १५ श्रीसूक्तमायुष्यसूक्तंसमुद्रज्येष्ठ
इत्यृचा एतैर्मंत्रैरभिषेकंमातापित्रोःशिशोस्तथा १६ ततःस्विष्टकृतंदद्याद्धोमशेषंसमाचरेत् हिरण्यंरजतंचैववस्त्रंधेनुंस:
दक्षिणां १७ अन्येषामपियथाशक्त्यादद्यात्पादक्षिणांतथा: ब्राह्मणान्भोजयेदत्रकारयेत्स्वस्तिवाचनं १८ इतिदर्शजननशां
तिः तत्रसिनीवालीकुह्वोर्दर्शभेदयोः शांत्योर्व्यवस्थोक्ता कंदोपरिशिष्टे भाष्ये चतुर्दश्यापांस्तोमायाश्चाष्टौयामा इतिनवप्रह
रात्रिंदुक्षयकालः चतुर्दश्यष्टमेयामेक्षीणोभवतिचंद्रमाः अमावास्याष्टमेभागेपुनः किलभवेदणुरितिवाक्यात् अत्रेदुरा
च्येप्रहरेवतिष्ठतेचतुर्थभागोनकलावशिष्टः तदंतमेवाक्षयमेतिकृत्स्नमेवंज्योतिश्चक्रविदोवदंतीतिवाकात् एवंचतुर्द ।
श्यांसामावास्यायामयोरणुचंद्रः शास्त्रचक्षुर्गोचरोभवतीसकालोदृष्टचंद्रत्वात्सिनीवाली अमांतोपांत्ययामयोः शास्त्रगोचरो
ति क्षीणचंद्रः सकलाः कुहूमध्यमाः पंचमामादर्शइतिव्यवस्थायशांतिव्यवस्थेति परेतः चतुर्दशीःमात्रयुक्तेहोरात्रेवर्तिन्य
मासिनीवाली प्रतिपन्मात्रयतेनकुहूः तथाचमवतीवामदर्शः केवलचतुर्दशीकेवलप्रतिपद्युक्तत्वाभावात् अत्रशिसिदर्शिन्मा
मवस्यांवासिनीवालीकुहूशांतिप्राप्त्यभावात् दर्शशांतिरितिपुत्तःमाहुः अथदर्शजननशांतिप्रयोगः कर्तास्यकुमारस्यकु
मार्यायादर्शजन्मसूचितानिष्टनिवृत्त्यर्थंशांतिकरिष्य इतिसंकल्प्य गणेशपूजास्वस्तिवाचनाचार्यादिवरणानिकुर्यात् अथाचा
र्यः स्वशाखाविकंप्रोक्षणादिकृत्वाग्नेर्दर्भेषु जलपूर्णंपंचगव्यपल्लवत्वकरवसूक्तंवासोयुग्मवेष्टितंकुंभमपात्रोपरिसंस्थाप्य ५६

सर्वेसमुद्रा इतितीर्थान्यावासा आपोहिष्ठेतिऋचेनकुर्यानग्निंत्र इत्यृचामन्त्रिंचेदमितिऋचा समुद्रज्येष्ठा इतिऋचेनाभिमंत्र्या
नत्रैतंसमदेशेसर्वारिष्टशांतयेतेषामायुः श्रियैचैवशान्तिहोमंकरोम्यहमित्युक्त्वा तत्पश्चिमे कुंडस्थंडिलेवाग्निप्रतिष्ठाप्यतदीशा
मायहासंपूज्यान्वाधानेआचारावाज्येनेमुक्त्वापित्रत् समिच्चरुभ्यामष्टाविंशतिवारंसोममसूर्यचाष्टोत्तरशतवारंशेष·
णान्योज्यगांतेन्वाधानक्रमेणप्रजामंत्रेहुत्वामाता पित्रशिभ्यनूहिरण्यवर्णामितिपंचदशर्चेन आयुष्यंवर्चस्यामिति
दशावर्चेनसमुद्रज्येष्ठा इत्यचा चतलधारयाभिषिंच्यस्विष्टकृदादिसमापयेत् यजमानवलिदानपूर्णाहुतितेहोमरूप्य
कलधेनु आचार्यायदत्त्वाब्रिगभ्यश्चयथाशक्तिदक्षिणांदत्वा विप्रान्संभोज्यस्वस्तिवाचनंकुर्यात् इतिदर्शनशांतिः ॥
अथज्येष्ठाशांतिः चटिकैकाचमैत्रांते ज्येष्ठादौचघटिकाद्वयं ज्येष्ठांतपादतातस्यपितुःस्वस्यविनाशकः ज्ञापनेनात्रेसंदेहो
दशाहाभ्यंतरेपिवाज्येष्ठे नैकन्यकाजाताहंतिशीघ्रंधनाग्रजं तत्कांजितस्यवक्ष्यामिमंडदोषप्रशांतये शुभदिनेशुभनक्षत्रे
चंद्रताराबलान्विते सूतकांतेतथाकुर्याज्ज्येष्ठशांतिविधानतः वज्रांकुशधरंदेवमैरावतगजान्वितं कुर्याच्छचीपतिंर
म्यंदेवेंद्रंसुरनायकं कर्षमात्रसुवर्णेनकर्षार्धमाथपादतः तद्विधानप्रकुर्वीतवित्तशाठ्यंनकारयेत् शालितंडुलसंपूर्णे
कुंभस्योपरिपूजयेत् इंद्रायेंद्रोमरुत्वन्त इतिमंत्रेणवाग्पतः गंधपुष्पैधूपदीपैस्तानाभक्तनिवेदनैः पूजयेद्विधिनाविप्रलोक
पालगणान्वितं रक्तवस्त्रद्वयेनपूजयेत्सुरनायकं तत्रसंस्थापयेत्कुंभानष्टवत्तदिक्षविधान्वितः तन्मध्येस्थापयेत्कुंभेशात
च्छिद्रसमन्वितं पुण्योदकसमायुक्तान्वस्त्रयुग्मेनवेष्टयेत् कुंभीशुविन्यसेद्धीमान्पंचगव्यसमंत्रकं पंचामृतंपंचरत्नंप
निकोपंचसंख्यका पंचत्वक्कषायांश्चपंचपल्लवकांस्तथा सुवर्णांकुशदूर्वांश्चशतौषधिविनिक्षिपेत् पूजयेद्वारुणैर्मंत्रैः

ॐभान्वीमान्ययत्नतः त्वंत्रोग्रग्रेजपेदादोसत्वत्रोपिद्वितीयकं समुद्रज्येष्ठाइतिइमंमेगंगाचतुर्थकं पूजयेद्वस्त्रयुग्माद्यैः
ग्रां·मं· चतुरःकलशानपि जयंकुर्याःप्रयत्नेनमंत्रैरेभिर्द्विजोत्तमा आनोभद्राजयंवादोभद्राग्रेद्वितीयकम् इदंसूक्तंरुद्रजाप्यज
५५ ६ पंमन्त्रंजपंततः इत्थंसंपूज्यदेवेशेवरुणांकुंभसंस्थितं स्वसंकल्पविधानेनहोमकर्मततश्चरेत् समिद्भिःब्रह्मवृक्षस्यशतम्
ष्टोत्तरंतथाः सर्पिषाचरुणाचैवमूलमंत्रेणवाग्रतः हुत्वातथ्यंचतेनैवयत्नइंद्रभयेतिच तिलान्याहुतिभिर्हुत्वाशतमष्टोत्तर
एयत् भार्याशिशुसमोपेतंयजमानंविशेषतः अभिषेकंप्रकुर्वीतमंत्रैवारुणसंज्ञितैः समुद्रज्येष्ठादिभिर्मंत्रैइमंमेवरुणे
स्तथा द्योःशांतेत्यादिभिर्मंत्रैः रभिषेकंप्रकुर्वीतमंत्रैर्वारुणसंज्ञितैः समुद्रज्येष्ठादिभिर्मंत्रैइमंमेवरुणस्तथा द्योःशांतेत्या·
दिभिषेकसमाचरेत् अभिषेकविष्टेतोतयज्ञमानःसमाहितः शुक्लांवराणिधृत्वाचकुर्यादाज्यावलोकनं रूपंरूपेणमंत्रेणवित्रे
तच्चसदेवचदेवताचरणस्थित्वाधूपदीपनिवेदनं इत्यादाचमनंसम्यकतांबूलार्च्यंतथैवच नमस्तेसुरनाथायनमस्तभ्यंशची
पते गृहाणार्घ्यंमयादत्तंगंडदोषप्रशांतये कार्यंतत्पूजकादीनांकरिंनयत्फलंशुभं जन्मान्तत्फलंसर्वदेवेंद्रायसमर्पयेत् आ
चार्यायचगांदद्यात्सुशीलांचयशस्विनी रक्तवर्णांवस्त्रयुतांसर्वालंकारभूषितं वस्त्रयुग्माभिधानांचपयाविभयसारतः यत्तंग
धर्वसिद्धैश्चपूजितोसिशचीपते दानेस्नानेनदेवेशगंडदोषंविनाशयः अष्टोत्तरशतंसंख्याकुर्याद्ब्राह्मणभोजनं तेभ्योपिदक्षि
णांदत्वाप्रणिपत्यक्षमापयेत् इमांकृत्वाज्येष्ठशांतियथाविधिक्रमार्गतः गंडदोषविनिर्मुक्तःआयुष्मानजायतेनरः इत्युक्तावृद्ध
गार्ग्येणशौनकायविशेषितः ज्येष्ठानक्षत्रसंभूतंगंडदोषप्रशांतये अज्ञानाद्यथवाज्ञानाद्देकल्पाद्यधनस्यच यन्यूनमतिरिक्तं ४५
वानत्सर्वंतत्क्षमर्हसि अथप्रयोगः गोमुत्वप्रसर्वंकृत्वास्पर्शोज्येष्ठाजननसूचितसकलारिष्टनिरसनद्वाराश्रीपरमेश्वरार्थंशां

तिंकरिष्य इति संकल्प्य गणपतिपूजनपुण्याहवाचनं नान्दीश्राद्धं चाचार्यमृत्विजश्च वरणानि कुर्यात् तत्र आचार्यः सर्षप·
विकरणं भूप्रेतणं कृत्वा महीद्यौरित्यादिविधिना शालितंडुलपूर्णं कुंभं संस्थाप्य पूर्वपात्रे परि हैमीमिंद्रप्रतिमां इंद्रायेंद्राम
रुत्वत इति मंत्रेण रक्तवस्त्रद्वयेन गंधादिभिश्च वाग्यतः पूजयेत् ततः इंद्र मित्रान् लोकपालान् समंतादावाह्य पूजयेत् ततः पू
र्वादिदिक्षु चतुरः कुंभान् स्थापयेत् सच्छिद्रं पुण्योदकवस्त्रमाल्ययुतं संस्थाप्य विक कुंभेषु पंचगव्यं पंचामृत पंचरत्नमृत्तिका पं
चत्वक्कषाये पंचपल्लवस्वर्णकुशदूर्वाः यवौषधीश्च दत्वा तत्रोभय इति पूर्वकलशे वदिले समुद्रज्येष्ठा इति पश्चिमे इमं
मे गंग इति उत्तरे च वरुणमावाह्य स्वस्वपुष्पाद्यैः पूजयेत् ततश्चत्वार ऋत्विजश्चालोभद्राभद्राने अग्नेर्नुरुषसूक्ते कद्रुद्रायेति
सूक्तानि जपेयुः आचार्यो मूलमंत्रं इंद्रं विश्वा अवीवृधन्नित्यग्रर्थ इंद्रसूक्तं रुद्र उपस्थं जपं जपेत् ततो ग्रियग्रहांश्च प्रतिष्ठाप्यान्वाद·
ध्यात् अत्र प्रधानं इंद्र पलाशसमिदाज्यं चरुद्रव्यैरष्टशतसंख्यया अष्टसहस्रसंख्यया वाहुतिभिः शेषेण स्विष्टकृन्मित्यादि बलिं
ते पूर्णाहुतिं पूर्णपात्रविमोकं च कृत्वा सभार्यं सशिशुयजमाने वरुणेः सूक्तैः समुद्रज्येष्ठा इमं मे वरुणश्चौः शान्तेत्यादिभिर·
भिषिंचेत् ततो द्रूपं द्रूपयित्वाज्यमवलोकनमात्रं सहदक्षिणं ब्राह्मणाय दत्वा इंद्रं संपूज्य नमस्ते सुरनाथाय नमस्ते भंपेशचीपते ।
गृहाणार्घ्यं मया दत्तं गंडदोषप्रशान्तये इत्यर्घ्यं दत्वाचार्यं प्रतिमादिभिश्च यो मददीत इंद्राय समर्प्य आचार्याय पयस्विनीं गां रक्त
वस्त्रचयं चदग्रोत्तरपूजान्ते इंद्रं विसृज्य प्रतिमां पदन् गंधर्वसिद्धेभ्यः पूजिनो सि शचीपते दानेनानेन देवेश गंडदोषं विनाशय ।
अज्ञानाद्यथवा ज्ञानाद्वैकल्याद्यायनस्य च यन्न्यूनं मतिरिक्तं वा तत्सर्वं तं नम हिंसि इति मंत्रेण दत्वा ऋत्विग्भ्योपि यथाशक्तिं द
त्वाग्निं विसृज्याष्टं तं ब्राह्मणान् भोजयेत् अथ मूलाशांतिः अथ शौनकः अथातः संप्रवक्ष्यामि मूलाजातहितायवै मातापित्रो·

र्धनस्याथकुलस्यास्याहितायच त्यागोवामूलजातस्यस्याद्दष्टाहृदर्शनं अभुक्तमूलजातानांपरित्यागोविधीयते अभुक्त
शां·मं· मूलजातस्यघाटाष्टकं एवंवृहिन्नारिप्रोक्तं मूलजायाफलैर्बुधैः कन्यायांतुविशेषःनबालाहंतिमूलाकेपितरंमातरंतथा मू
४८ लजाश्वशुरंहंतिव्यालजंचननंदगनात् माहेंद्रजाग्रजंहंतिदेवरंचद्विदेवजा व्यालस्यश्लेषामाहेंद्रं ज्येष्ठं द्विदेवंविशाखाशांति
४७ र्वाषकलाचेत्साज्ञद्विदोषोनकथनेनेति पुनर्वाकालाप्रवक्ष्यामिशांतिहोमजपंततः जातस्याद्वादशाहेवातस्मैवाशुभेदिने स
